# संस्कृत सोपानम्

भाग 2



# संस्कृत सोपानम्

## भाग 2

लेखक

डॉ॰ सुरेन्द्र गम्भीर
एम॰ ए॰ (संस्कृत, भाषा-विज्ञान)
साहित्यशास्त्री, पी-एच॰डी॰
भू॰पू॰ अध्यक्षः, संस्कृत विभागः
मॉडर्न स्कूल, नई दिल्ली

पीताम्बर पब्लिशिंग कम्पनी प्रा॰ लि॰
888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)

शाखाएँ
बैंगलोर : आवास न॰ 6/2, III मेन रोड, एस॰के॰ गार्डेन, बेन्सन टाउन पोस्ट, बैंगलोर-560046 दूरभाष : 080-23534673
चेन्नई : 10, हंटर्स रोड, प्रथम तल, चुलाई, चेन्नई-600112 दूरभाष : 044-25322333
हैदराबाद: ए जी-18, शांति बाग अपार्टमैंट्स, बेगमपेट, हैदराबाद-500016 दूरभाष : 040-23737423
जयपुर : 113, इंद्रा कालोनी, बनी पार्क, जयपुर-302016 दूरभाष : 0141-2203440

प्रकाशक :
पीताम्बर पब्लिशिंग कम्पनी प्रा० लि०
888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)
दूरभाष : 23670067, 23522997, 23625528
फैक्स : 91-11-23676058, 91-11-25765754
E-mail : pitambar@bol.net.in

**संस्करण** : प्रथम, 1972
पुनर्मुद्रण, 1973, 1974, 1975
द्वितीय, 1976
पुनर्मुद्रण, 1976, 1977, 1978, 1979, 1980, 1981, 1982
तृतीय, 1983
पुनर्मुद्रण, 1984, 1985, 1986, 1987, 1988, 1989, 1990, 1991
चतुर्थ, 1992
पुनर्मुद्रण, 1993, 1994, 1995
पंचम, 1996
पुनर्मुद्रण, 1997, 1998, 1999, 2000
संशोधित एवं परिमार्जित संस्करण, 2001
पुनर्मुद्रण : 2002, 2003

**प्रिय ग्राहक**
आपको जाली/नकली पुस्तको से बचाने के लिए हमने इस पुस्तक मे यह होलोग्राम चिपकाया हुआ है । यदि यह होलोग्राम यहाँ नहीं है तो कृपया पुस्तक को न खरीदें क्योंकि यह जाली/नकली हो सकती है । अगर आपको बिना होलोग्राम कोई पुस्तक प्राप्त हो तो कृपया हमें सूचित करे ।
**प्रकाशक**

**सर्वाधिकार** : © सुरक्षित

**कोड नं.** : 12620

**ISBN** : 81-209-0547-4

**मूल्य** : 63/- रुपये

**आवरण :** (1) महाकवि कालिदास शकुन्तला की रचना करते हुए । (2) जर्मन विद्वान मैक्सम्यूलर — जिन्होंने संस्कृत ग्रंथों का अनुवाद जर्मन भाषा में किया तथा गीता-उपदेश का चित्र ।

इस पुस्तक पर आधारित अभ्यास – पुस्तिका भी प्राप्य है।

पीयूष प्रिंटर्स पब्लिशर्स प्रा० लि०, नई दिल्ली-41 द्वारा मुद्रित ।

# किञ्चित्



प्रस्तुतमाला-विषयकम्

भाषा-मनोविज्ञान-शास्त्रिणां शोधैः भाषा-शिक्षणमपि कला-रूपेण उपस्थापितम् । अल्पादपि अल्पतरे समये अधिकस्य शिक्षणस्य स्पर्धा सर्वत्र दृष्टिपथमवतरति । कस्या अपि भाषायाः शिक्षणस्य चतस्रः विधा भवन्ति, तथाहि-श्रवणं, वदनं, पठनं लेखनञ्चेति । परं संस्कृत-सदृश्यै भाषायै पठनं तदवगमश्चैव प्राधान्येन लक्ष्यीकृतं स्याद् इत्यस्ति व्यवस्थिता मनीषा भाषा-शास्त्र-विदाम् । गौणरूपेण पठनविधायाः साधनरूपेण वदनादि-विधा अपि अनुशील्यन्ताम् । सत्यमेतत् यत् भाषा-भाषणेन छात्राणां विश्वासो वर्धते रुचिश्चापि वृद्धिं गच्छति । एतद् विचार्यैव अत्र ललितानि संस्कृत-पद्यानि, दैनन्दिन-व्यवहार-पराणि कानिचित् सरल-संस्कृत-वाक्यानि च पुस्तकारम्भे दत्तानि । अनुदिनम् एतेषाम् अनुशीलनेन छात्राणां संस्कृत-भाषां प्रति अनुरक्तिर्वर्धिष्यते इत्याशासे । भाषा-शिक्षण-विधानां प्रधान्य-गौण-व्यवस्थाया विस्मरणं न भवेत् इत्यावश्यकम् । लक्ष्ये स्पष्टे पन्था अपि स्पष्टो जायते ।

प्रत्येकं पुस्तकं छात्रस्य आयुस्स्तरमावश्यकताञ्च विलोक्यैव प्रणीतम् । भाषा-ज्ञान-भित्तिः आदित एवं दृढमूला सुसंहता च भवेदिति दृशा सर्वमत्र क्रमिकं मितं नियतञ्चास्ति । प्रत्येकं शब्दः कयापि योजनयैव सन्निवेशितः । प्रस्तुत-मालायां शब्दा इत्थं प्रयुक्ताः, वाक्य-रचना एवमायोजिता व्याकरणञ्चेत्थं क्रमेण अल्पाल्पशः गुम्फितं येन बालः सारल्येनैव सर्वं शिक्षेत । क्रमिक-शिक्षणं क्रमिक-विकासाय आवश्यकम् । भाषा-शिक्षणेन साकं साहित्यस्य रुचिरा ललिताश्चांशाः सन्निवेशिताः । संस्कृत-वाङ्मय-महोदधि मंथनोत्थानि कथा-रत्नानि पद्य-रत्नानि निदर्शन-भूतानि चात्र गुम्फितानि । अन्यच्च, विज्ञान-संस्कृति-सामाजिक-ज्ञानादि-विषयान् अन्तरेण पाठा अपि चात्र सन्निविष्टा सन्ति ।



प्रत्येकं पाठस्योपरि पाठ्य-संकेतेन पाठे यदुद्दिष्टं तदवगमे सौकर्यं भविष्यति । सन्धीनां समासानां चाप्रयोगः सारल्यनिमित्तकः । पुस्तकस्यान्ते दत्तश्शब्दकोशः बालान् शब्दकोशस्यानुशीलनाय प्रवर्तयिष्यते । पाठेभ्यः व्यतिरिक्तमभ्यासेष्वपि अन्ये प्ररोचकाः बुद्ध्युत्तेजकाः प्रयोगाः प्रश्नाश्च दत्ताः ।

वस्तुस्थितिरियं यत् न वयं छात्रेषु बहु आशास्महे । शिक्षाविदां तर्कानुभवानुमोदितं वचः यत् यावत छात्रेषु सम्भाव्यते तावत्येव ते कृत-प्रयत्नाः भवन्तीति शम् ।

–गम्भीरः

# विषय सूची


| पाठः | | पृष्ठः |
|---|---|---|
| प्रथमः | ईश्वर-वंदना | 1 |
| द्वितीयः | लङ्-लकारः (प्रथमपुरुषः एकवचनम्) | 3 |
| तृतीयः | लङ्-लकारः (प्रथमपुरुषः द्विवचनम्) | 6 |
| चतुर्थः | लङ्-लकारः (प्रथमपुरुषः बहुवचनम्) | 9 |
| पंचमः | लङ्-लकारः (मध्यमपुरुषः एकवचनम्) | 12 |
| षष्ठः | लङ्-लकारः (मध्यमपुरुषः द्विवचनम्) | 15 |
| सप्तमः | लङ्-लकारः (मध्यमपुरुषः बहुवचनम्) | 18 |
| अष्टमः | लङ्-लकारः (उत्तमपुरुषः एकवचनम्) | 21 |
| नवमः | लङ्-लकारः (उत्तमपुरुषः द्विवचनम्) | 24 |
| दशमः | लङ्-लकारः (उत्तमपुरुषः बहुवचनम्) | 27 |
| एकादशः | लोट्-लकारः (प्रथमपुरुषः एकवचनम्) | 30 |
| द्वादशः | लोट्-लकारः (प्रथमपुरुषः द्विवचनम्) | 33 |
| त्रयोदशः | लोट्-लकारः (प्रथमपुरुषः बहुवचनम्) | 36 |
| चतुर्दशः | लोट्-लकारः (मध्यमपुरुषः एकवचनम्) | 39 |
| पंचदशः | लोट्-लकारः (मध्यमपुरुषः द्विवचनम्) | 42 |
| षोडशः | लोट्-लकारः (मध्यमपुरुषः बहुवचनम्) | 46 |
| सप्तदशः | लोट्-लकारः (उत्तमपुरुषः एकवचनम्) | 50 |
| अष्टादशः | लोट्-लकारः (उत्तमपुरुषः द्विवचनम्) | 53 |
| नवदशः | लोट्-लकारः (उत्तमपुरुषः बहुवचनम्) | 56 |
| विंशतितमः | मम विद्यालयः | 59 |
| एकविंशतितमः | देशस्य रक्षा | 62 |
| द्वाविंशतितमः | विज्ञानस्य चमत्काराः | 65 |
| त्रयोविंशतितमः | बुद्धेः शक्तिः | 70 |
| चतुर्विंशतितमः | मूर्खः कच्छपः | 73 |
| पंचविंशतितमः | श्रृगालः सिंह न भवति | 76 |
| षड्विंशतितमः | श्रद्धायाः प्रभावः | 80 |
| सप्तविंशतितमः | महात्मा गांधीः | 84 |
| | व्याकरणम् | 87 |
| | शब्द-कोशः | 104 |

# व्यवहार - वाक्यानि

| | |
|---|---|
| 1. प्रणमामि! | (Hello; Good morning; Good afternoon; etc.) |
| 2. आगम्यताम्! | (Please come.) |
| 3. उपविश्यताम्! | (Please have a seat.) |
| 4. स्वागतम्! सुस्वागतम्! | (Welcome ! Welcome !!) |
| 5. अपि सर्वम् कुशलम् ? | (How is everything? How are you?) |
| आम् सर्वम् कुशलम् । | (Yes, everything is fine.) |
| 6. त्वम् कुत्र निवससि? | (Where do you live?) |
| अहम् गणेशपुरी इति क्षेत्रे निवसामि। | (I live in a locality called Ganeshpuri.) |
| 7. कः समयः ? | (What is the time?) |
| इदानीम् एकादश-वादनम् । | (Now. it is 11 O'clock.) |
| 8. को दिनाङ्कः अद्यः? | (What is the date today?) |
| अद्य जुलाई-मासस्य विंशतिः। | (Today, it is July 20th.) |
| 9. एतत् सुन्दरम्! | (This is beautiful.) |
| 10. तूष्णीम् तिष्ठतु! | (Be quiet.) |

(Continue using Sanskrit sentences from *Sanskrit Sopanam*, Part-1. Use the above sentences regularly in appropriate situations. Also, role play them with other students.)

# सुभाषितानि

संस्कृत का साहित्य सरस और विचारोत्तेजक श्लोकों का भण्डार है। चार श्लोक छात्रों ने गत वर्ष याद किये थे। इस वर्ष के लिए पाँच और श्लोक नीचे दिये जाते हैं। छात्र मिलकर इनका पाठ करें और इन्हें कण्ठस्थ करें।

Sanskrit literature is the storehouse of lyrical and thought-provoking verses. Students learned four verses last year. For the current year, there are five more verses given below. Students should recite them together and learn them by heart.

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव-देव ॥ १ ॥

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥ २ ॥

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥ ३ ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म-संस्थापनार्थाय सम्भवामि युगे-युगे ॥ ४ ॥

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः ॥ ५ ॥

प्रथमः पाठः

# ईश्वर-वन्दना

## (गत वर्ष के कार्य की आवृत्ति-Review)

ईश्वर-वन्दना प्रातःकालः देवालयः देवः अर्च् स्मृ (स्मर्) सर्वत्र



अधुना प्रातःकालः अस्ति। भक्ताः देवालयम् गच्छन्ति। तत्र ते देवम् नंस्यन्ति। तापसाः वने भ्रमन्ति। तत्र ते अपि ईश्वरम् अर्चन्ति। विद्यालये छात्राः अपि ईश्वरम् स्मरन्ति। ईश्वरः सर्वत्र अस्ति। प्रातः खगाः कूजन्ति। ते अपि ईश्वरम् एव स्मरन्ति। ईश्वरः भक्तान् रक्षति।

वयम् अपि ईश्वरम् स्मरिष्यामः नंस्यामः च।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| ईश्वर-वन्दना | = | ईश्वर की पूजा | (worship of God) |
| प्रातःकालः | = | सुबह का समय | (morning time) |
| देवालयः | = | मन्दिर | (temple) |
| देवः | = | देवता | (god) |
| अर्च् | = | पूजा करना | (to worship) |
| स्मृ (स्मर्) | = | याद करना | (to remember) |
| सर्वत्र | = | सब जगह | (everywhere) |

नए धातु -- अर्च् (1) स्मृ (2) *
नया अव्यय – सर्वत्र

## अभ्यासः

### मौखिकम्

1. संस्कृत शब्द बताइए (Give Sanskrit equivalents).
   भी, वहाँ, ईश्वर, मन्दिर ।
2. निम्न शब्दों का शुद्ध उच्चारण कीजिए (Pronounce the following words correctly).
   नंस्यन्ति, प्रातःकालः, विद्यालये, सर्वत्र, स्मरिष्यामः, वयम् ।

### लिखितम्

3. रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks).
   ईश्वरः ........................ अस्ति । ते ........................ नंस्यन्ति । प्रातः खगा ........................ । ........................ भक्तान् रक्षति । ........................ देवालयम् गच्छन्ति ।
4. निम्नलिखित शब्दों के अर्थ लिखिए (Write meanings of the following words).
   नंस्यन्ति, ते, अपि, एव, भ्रमन्ति, तापसाः, काकः, कुत्र ।
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit).

| | |
|---|---|
| 1. छात्र पाठ पढ़ते हैं । | 1. Students read the lesson. |
| 2. हम ईश्वर को याद करते हैं। | 2. We remember God. |
| 3. हम देव को नमस्कार करेंगे । | 3. We will bow to God. |
| 4. वे यहाँ घूमते हैं । | 4. They walk around here. |
| 5. लड़की ईश्वर की पूजा करेगी । | 5. The girl will worship God. |

पुस्तक में **नियमित धातुओं** को क्र. (1) से सूचित किया गया है, **अर्धनियमित** को क्र. (2) से और **अनियमित** को क्र. (3) से ।

* In the book, **Regular verb-roots** are denoted by the number (1), **Semi-regular** by the number (2), and **Irregular** by the number (3).

द्वितीयः पाठः

# लङ्-लकारः

## (प्रथमपुरुषः एकवचनम्)

हृ (हर्) भार्या आसीत् आचार्यः निबन्धः कथा कथ् (कथय्) मेधाविक

छात्रः अलिखत्।
छात्रः कलमेन अलिखत्।



सः अगच्छत्।
सः ग्रामम् अगच्छत्।

अश्वः अतिष्ठत्।
अश्वः जलाय अतिष्ठत्।

फलम् अपतत्।
फलम् वृक्षात् अपतत्।



रावणः अहरत्।
रावणः रामस्य भार्याम् अहरत्।

भ्रमरः आसीत्।
भ्रमरः पुष्पेषु आसीत्।

आचार्यः अपश्यत् अवदत् च, "हे छात्र, त्वम् किम् लिखसि?" छात्रः अवदत्–"गुरुदेव, अहम् निबन्धम् अलिखम्। अधुना कथाम् लिखामि।" आचार्यः अकथयत्–"हे छात्र, त्वम् मेधाविकः भविष्यसि।" छात्रः प्रसन्नः अभवत्।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| हृ (हर्) | = | चुराना | (to steal) |
| भार्या | = | पत्नी | (wife) |
| आसीत् | = | (*वह*) था/थी | (*he/she* was) |
| आचार्यः | = | गुरु | (teacher) |
| निबन्धः | = | लेख | (essay) |
| कथा | = | कहानी | (story) |
| कथ् (कथय्) | = | कहना | (to say) |
| मेधाविक | = | बुद्धिमान | (intelligent) |

**नए धातु (New Verb-roots)– हृ (2), कथ् (2)**

**नए रूप (New Nouns)– भार्या, कथा–*लता के समान* (like लता)**

**नया विशेषण तीनों लिंगों में (New Adjective- in three genders)—**

मेधाविकः मेधाविका मेधाविकम्

## अभ्यासः

### मौखिकम्

1. इस पाठ का शुद्ध उच्चारण कीजिए (Read this lesson aloud. Use correct pronunciation).
2. अर्थ बताइए (Give the meanings)—
   आसीत्, भार्या, वृक्षात्, रामस्य, अधुना, मेधाविकः

## लिखितम्

3. कोष्ठक में दिए शब्दों में उचित विभक्ति लगाकर वाक्य पूरे कीजिए : (Affix the appropriate vibhakti to the words within parenthesis to complete the sentences).

प्रातः (सूर्य) .......... प्रकाशः भवति। छात्राः (विद्यालय) .................. गच्छन्ति।
अहम् (निबन्ध) .............. अलिखम्। बालाः (गृह) ................ अपि पठन्ति।
सः (गुरुदेव) ............ सह गच्छति।

4. शब्दों का लिंग बताइए (Write the gender of each word)—
कथा, आचार्यः, फलम्, उद्यानम्, प्रसन्नः

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. तपस्वी आश्रम में रहा।
2. राम के बिना मोहन नहीं पढ़ा।
3. हम रोज़ सवेरे घूमते हैं।
4. गोपाल ने भी संस्कृत पढ़ी।
5. उसने रावण को मारा।

1. The ascetic lived in a hermitage.
2. Mohan did not study without Rama.
3. We go for a walk in the morning everyday.
4. Gopal also studied Sanskrit.
5. He killed Ravana.



तृतीयः पाठः

# लङ्-लकारः

## (प्रथमपुरुषः द्विवचनम्)

**पञ्जरकः हयः खन् श्रमिकः धरा आस्ताम् गवेष् (गवेषय्) मारय् विन्द्**

तौ अरक्षताम्।
तौ सैनिकौ अरक्षताम्।
तौ सैनिकौ देशम् अरक्षताम्।



तौ अकूजताम्।
तौ खगौ अकूजताम्।
तौ खगौ पञ्जरके अकूजताम्।

तौ अखनताम्।
तश्श्रमिकौ अखनताम्।
तौ श्रमिकौ धराम् अखनताम्।



ते अखेलताम्।
ते बाले अखेलताम्।
ते बाले हयः अखेलताम्।

आस्ताम्।
ते छात्रे आस्ताम्।
ते छात्रे मार्गे आस्ताम्।

सः छात्रः अपठत्। तौ छात्रौ अपठताम्।
सा छात्रा अपठत्। ते छात्रे अपठताम्।
सः भक्तः तत्र आसीत्। तौ भक्तौ तत्र आस्ताम्।

रामः लक्ष्मणः च वनम् अगच्छताम्। सीता अपि रामेण सह अगच्छत्। तत्र रावणः सीताम् अहरत्। तौ वीरौ सीताम् अगवेषयताम्। तौ रावणम् अमारयताम्, सीताम् च अविन्दताम्। तौ प्रसन्नौ अभवताम्। सीता अपि प्रसन्ना अभवत्।



## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| पञ्जरकः | = | पिंजरा | (cage) |
| ह्यः | = | कल (बीता हुआ) | (yesterday) |
| खन् | = | खोदना | (to dig) |
| श्रमिकः | = | मज़दूर | (labourer, worker) |
| धरा | = | भूमि | (ground) |
| आस्ताम् | = | (वे दो) थे/थीं | (*they two* were) |

| | | | |
|---|---|---|---|
| गवेष् (गवेषय्) | = | ढूँढना | (to search) |
| मारय् | = | मारना | (to kill) |
| विन्द् | = | पाना | (to get) |

**नए धातु (New Verb-roots)**

खन् (1), मारय् (1), गवेष् (2), विन्द् (2)

**नया रूप (New Noun)—धरा – *लता के समान* (like लता)**

## अभ्यासः

### मौखिकम्

1. 'श्रमिक' शब्द के रूप बोलिए (Decline 'श्रमिक').
2. 'गम्' धातु के रूप लृट् लकार में बोलिए (Conjugate 'गम्' in लृट्).

### लिखितम्

3. 'उद्यान' शब्द के रूप 'फल' शब्द की तरह लिखिए (Decline 'उद्यान' like 'फल')
4. हिन्दी में अनुवाद कीजिए (Translate into English)—

बाले अखेलताम्। तौ प्रसन्नौ आस्ताम्। सीता अपि रामेण सह अगच्छत्। श्रमिकौ धराम् अखनताम्। तत्र रावणः सीताम् अहरत्।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. क्या दो बालिकाएँ विद्यालय गईं? | 1. Did the two girls go to the school? |
| 2. तुम दोनों ने स्कूल देखा। | 2. Two of you saw the school. |
| 3. दो मज़दूरों ने धरती खोदी। | 3. The two workers dug the ground. |
| 4. राम और लक्ष्मण ने सीता को पाया। | 4. Ram and Lakshman found Sita. |
| 5. पिंजरे में दो पक्षी थे। | 5. There were two birds in a cage. |
| 6. क्या राम भी पाठशाला जाएगा? | 6. Will Ram too go to the school? |

❑ ❑

चतुर्थः पाठः

# लङ्-लकारः

(प्रथमपुरुषः बहुवचनम्)

सूच् (सूचय्) दूतः गीतम् सिव् (सीव्य्) सौचिकः आसन् वृषभः
नृत् (नृत्य्) महवीरः महाभारत-युद्धम् कौरवः नाशय्



सिंहाः अगर्जन्।
ते सिंहाः अगर्जन्।
ते सिंहाः वनेषु अगर्जन्।

दूताः असूचयन्।
ते दूताः असूचयन्।
ते दूताः नृपम् असूचयन्।

गायकाः अगायन्।
ते गायकाः अगायन्।
ते गायकाः गीतानि अगायन्।



सौचिकाः असीव्यन्।
ते सौचिकाः असीव्यन्।
ते सौचिकाः वस्त्राणि असीव्यन्

वृषभाः तत्र आसन्।
वृषभाः क्षेत्रेषु आसन्।

| | | |
|---|---|---|
| काकः अपश्यत् | काकौ अपश्याताम् | काकाः अपश्यन् |
| बालिका अनृत्यत् | बालिके अनृत्यताम् | बालिकाः अनृत्यन् |
| सः आसीत् | तौ आस्ताम् | ते आसन् |
| सा आसीत् | ते आस्ताम् | ताः आसन्। |

पाण्डवाः पञ्च आसन्। पाण्डवेषु भीमः अर्जुनः च महावीरौ आस्ताम्। श्रीकृष्णः अपि पाण्डवैः सह आसीत्। महाभारत-युद्धे ते कौरवान् अनाशयन्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| सूच् (सूचय्) | = | सूचित करना | (to inform) |
| दूतः | = | दूत | (messenger) |
| गीतम् | = | गीत | (song) |
| सिव् (सीव्य्) | = | सीना | (to stitch, sew) |
| सौचिकः | = | दर्ज़ी | (tailor) |
| आसन् | = | (वे थे/थीं) | (*they* were) |
| वृषभः | = | बैल | (bull) |
| नृत् (नृत्य्) | = | नाचना | (to dance) |
| महावीरः | = | महान् वीर | (very brave) |
| महाभारत-युद्धम् | = | महाभारत का युद्ध | (battle of Mahabharat) |
| कौरवः | = | कौरव | (Kaurava) |
| नाशय् | = | नष्ट करना | (to destroy) |

**नये धातु (New Verb-roots)** — सूच् (2), नृत् (2), सिव् (2), नाशय् (1)

**नया विशेषण (New adjective)** — (महा) वीरः वीरा वीरम्।

## अभ्यासः

मौखिकम्

1. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
छात्राः कुत्र अपठन्? सीता कुत्र भ्रमति? त्वम् किम् पठसि? आचार्याः कुत्र अगच्छन्? बालाः किम् अलिखन्?

2. अर्थ बताइए (Give the meanings)—

कौरवाः अपि अनश्यन्। त्वम् मालाम् अपश्यः? सीता अपि प्रसन्ना आसीत्। आचार्यः अपश्यत् अवदत् च। खगौ पञ्जरके अकूजताम्।

## लिखितम्

3. अर्थ लिखिए (Give the meanings)—

स्था, पा, पत्, धाव्, नी, दृश्, भू, पच्

4. धातुओं के लङ् लकार के रूपों से वाक्य पूरे कीजिए (Complete the sentences with लङ् forms of the verb-roots)—

(क) सीता रामेण सह ............ (गम्)।

(ख) भक्ताः ईश्वरम् ............ (स्मृ)।

(ग) त्वम् किम् ............ (दृश्)?

(ग) खगः जलम् ............ (पा)।

(ङ) वयम् फलानि ............ (खाद्)।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. दर्जियों ने कपड़े सिए। | 1. The tailors stitched the clothes. |
| 2. वनों में शेर गरजे। | 2. Lions roared in the forests. |
| 3. तुम वहाँ क्यों नहीं आए? | 3. Why did you not come there? |
| 4. क्या दूतों ने सूचना दी? | 4. Did the messengers give the information? |
| 5. वीरों ने शत्रुओं का नाश किया। | 5. The brave people destroyed the enemies. |
| 6. घर में बालक रोए। | 6. Children cried in the house. |
| 7. हम हाथों से खाते हैं। | 7. We eat with hands. |
| 8. हम वहाँ नहीं ठहरेंगे। | 8. We will not stay there. |

पञ्चमः पाठः

# लङ्-लकारः

## (मध्यमपुरुषः एकवचनम्)

**गुम्फ् माला प्रच्छ् (पृच्छ्) प्रश्नः अम्बा आसीः गर्व् अतः नश् (नश्य्) यः**



त्वम् अहसः।
त्वम् किमर्थम् अहसः ?

त्वम् अगुम्फः।
त्वम् मालाम् अगुम्फः।

त्वम् अपृच्छः।
त्वम् प्रश्नम् अपृच्छः।



त्वम् अयच्छः।
त्वम् किम् अयच्छः ?

त्वम् अस्मरः।
त्वम ईश्वरम् अस्मरः।

त्वम् कुत्र आसीः ?
त्वम् प्रातः कुत्र आसीः ?

हे रावण, त्वम् रामस्य भार्याम् अहरः। त्मम् अगर्वः च। अतः त्वम् अनश्यः। यः अपि मानवः अगर्वत् सः एव अनश्यत्। कौरवाः अपि अनश्यन्।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| गुम्फ् | = | गूँथना | (to string) |
| माला | = | हार | (garland) |
| प्रच्छ् (पृच्छ्) | = | पूछना | (to ask) |
| प्रश्नः | = | सवाल | (question) |
| आसीः | = | *(तुम एक)* थे | (*you* were) |
| प्रातः | = | सुबह | (in the morning) |
| गर्व् | = | अभिमान करना | (to be haughty) |
| अतः | = | इसलिए | (therefore) |
| नश् (नश्य्) | = | नष्ट होना | (to perish) |
| यः | = | जो | (whosoever) |

**नए धातु (New verb-roots)** – गुम्फ् (1), गर्व् (1), प्रच्छ् (2), नश् (2)

**नए रूप (New Nouns)** – माला, अम्बा– *लता के समान* (like लता)

**नये अव्यय (New avyayas)** – अतः, प्रातः

## अभ्यासः

### मौखिकम्

1. संस्कृत पर्याय बताइए (Give the Sanskrit equivalents)—

सवाल (question), तू (you), माता (mother), था (was), किसलिए (for

what), किसान (farmer), अब (now), स्कूल (school)

2. दृश् धातु के लृट् रूप बताइए। (Conjugate दृश् in लृट्)

## लिखितम्

3. नीचे लिखे शब्दों को संस्कृत-वाक्यों में प्रयुक्त कीजिए (Use the following words in Sanskrit sentences)- -

किमर्थम्, आसीः, अस्मरः, प्रश्नः, कौरवाः, पुस्तकम्।

4. शब्दों को रिक्त-स्थानों में यथास्थान भरिए (Insert the following words in the appropriate blanks)—

पाठम्, अपृच्छः, गच्छति, सह, विना

छात्रः पाठशालाम् ...................... । अहम् ...................... पठामि। सीता रामेण ...................... अगच्छत् त्वम् प्रश्नम् ...... त्वम् ......... । ते रामम् .............. खेलन्ति।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. तुमने प्रश्न क्यों नहीं पूछा? | 1. Why did you not ask the question ? |
| 2. हे राम, तुमने अपने पिता को नमस्कार क्यों नहीं किया? | 2. Hey Ram, why did you not bow to your father ? |
| 3. हे बालिके, तुम चुपचाप क्यों थीं? | 3. Hey girl, why were you quiet ? |
| 4. हे दूत, तुम क्यों नहीं जाते? | 4. Hey messenger, why don't you go ? |
| 5. तुम क्यों हँसे? | 5. Why did you laugh ? |
| 6. क्या तुम घर कल जाओगे? | 6. Will you go home tomorrow ? |

| षष्ठः पाठः | लङ्-लकारः |
| --- | --- |

## (मध्यमपुरुषः द्विवचनम्)

रच् (रचय्) मूर्तिः वाञ्छ् वृद्धिः आस्तम् तूष्णीम् बधिर मूक किम् अपि

युवाम् अधावतम्।
युवाम् क्षेत्रे अधावतम्।



युवाम् अवदतम्।
युवाम किम् अवदतम्?

युवाम् अरचयतम्।
युवाम् मूर्तिम् अरचयतम्।

युवाम् अवाञ्छतम्।
युवाम् वृद्धिम् अवाञ्छतम्।



युवाम् कुत्र आस्तम्?
युवाम् बालिके कुत्र आस्तम्?

त्वम् गीतम् आगायः।
युवाम् गीतम् अगायतम्।

| | |
|---|---|
| त्वम् अम्बाम् अरक्षः। | युवाम् अम्बाम् अरक्षतम्। |
| त्वम् कुत्र आसीः? | युवाम् कुत्र आस्तम्? |

आचार्यः अवदत् – 'हे छात्रौ, युवाम् किमर्थम् न अवदतम्? युवाम् तूष्णीम् किमर्थम् आस्तम्? किम् युवाम बधिरौ स्थः मूकौ वा ? अधुना अत्र किमपि न अस्ति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| रच् (रचय्) | = | बनाना | (to make) |
| मूर्तिः | = | प्रतिमा | (statue) |
| वाञ्छ् | = | इच्छा करना | (to want) |
| आस्तम् | = | *(तुम दो)* थे | (*you two* were) |
| तूष्णीम् | = | चुपचाप | (quiet) |
| बधिर | = | बहरा | (deaf) |
| मूक | = | गूँगा | (dumb) |
| किमपि | = | कुछ भी | (anything) |

**नये धातु (New Verb-roots)–** रच् (2), वाञ्छ् (1)

**नए रूप (New Nouns)–** मूर्ति, वृद्धि–*मति के समान* (like मति)

**नए विशेषण (New Adjectives)–** बधिरः बधिरा बधिरम्
मूकः मूका मूकम्

**नये अव्यय (New avyayas)–** तूष्णीम्, किमपि

## अभ्यासः

### मौखिकम्

1. 'गीत' शब्द के रूप ('फल' की तरह) बताइए। (Decline 'गीता' like 'फल')
2. 'वाञ्छ्' धातु के रूप लङ् लकार में बताइए । (Conjugate 'वाञ्छ्' in लङ्)

## लिखितम्

3. शब्दों के अर्थ लिखिए (Give meanings)—

मूर्तिः, बधिरौ, तूष्णीम्, किमपि, मूकौ, द्रक्ष्यामः, खट्वा, गीता।

4. हिन्दी में अनुवाद कीजिए (Translate into English)—

किम् युवाम् बधिरौ स्थः? किम् युवाम् मूर्तिम् अरचयतम्? युवाम् आचार्यम् अवदतम्। पाण्डवाः पञ्च आसन्। गायकाः गीतानि अगायन्।

5. संस्कृत में अनुवाद कीजिए (Translate into English)—

1. हे कलाकारो! तुम दोनों मूर्ति चाहते थे। — 1. Oh artists, both of you wanted the statue.
2. हे सैनिको! तुम दोनों ने देश की रक्षा की। — 2. Oh soldiers, both of you defended the country.
3. तुम दोनों वहाँ नहीं थे। — 3. Both of you were not there.
4. दो बैलों ने घोड़े को मार डाला। — 4. The two bulls killed the horse.
5. तुमने किसान को जान लिया। — 5. You came to know the farmer.
6. हे मज़दूरो! तुम क्या ले गए ? — 6. Oh workers, what did you take ?



सप्तमः पाठः

# लङ्-लकारः

## (मध्यमपुरुषः बहुवचनम्)

**भूमिः आस्त विपत्तिः सम्पत्तिः कीर्तिः कर्तव्यम् कथम् सम्मतिः यदि उक्तिः मतिः धृ (धारय्) जीवनम् सफल**

यूयम् अभ्रमत।
यूयम् उद्यानेषु अभ्रमत।



यूयम् अयच्छत।
यूयम् बालेभ्यः पुस्तकानि अयच्छत।

यूयम् अखनत।
यूयम् भूमिम् अखनत।

यूयम् तत्र आस्त।
यूयम् तत्र विपत्तौ आस्त।

| | | |
|---|---|---|
| त्वम् अखादः। | युवाम् अखादतम्। | यूयम् अखादत। |
| त्वम् अलिखः। | युवाम् अलिखतम्। | यूयम् अलिखत। |
| त्वम् तत्र आसीः। | युवाम् तत्र आस्तम्। | यूयम् तत्र आस्त। |

यूयम् सम्पत्तिम् अनाशयत। अतः यूयम् कीर्तिम् न अविन्दत। यूयम् स्वम् कर्त्तव्यम् कथम् न अवागच्छत? मम सम्मतिः अस्ति यत् यूयम् स्वाम सम्पत्तिम् रक्षथ। यदि मम उक्तिम् मतौ धारयिष्यथ तदा जीवने सफलाः भविष्यथ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| भूमिः | = | भूमि | (ground) |
| आस्त | = | (*तुम सब*) थे | (*you all*) were |
| विपत्तिः | = | मुसीबत | (hardship) |
| सम्पत्तिः | = | धन-दौलत | (wealth) |
| कीर्तिः | = | यश | (fame) |
| कर्त्तव्यम् | = | कर्त्तव्य | (duty) |
| कथम् | = | क्यों | (why) |
| सम्मतिः | = | सलाह | (suggestion) |
| यदि | = | अगर | (if) |
| उक्तिः | = | कहना | (statement, saying) |
| मतिः | = | बुद्धि | (mind) |
| धृ (धारय्) | = | धारण करना | (to bear) |
| जीवनम् | = | जीवन | (life) |
| सफल | = | सफल | (successful) |

**नया धातु (New Verb-root)** — धृ (2)

**नए रूप (New Nouns)** — भूमि, विपत्ति, सम्पत्ति, कीर्ति, सम्मति, उक्ति—*मति के समान* (like मति)

**नया विशेषण (New adjective)** — सफलः सफला सफलम्

**नए अव्यय (New avyayas)** — कथम्, यदि

**उपपद विभक्ति** — दा धातु के योग में, जिसको दिया जाए, उसके वाचक शब्द में चतुर्थी विभक्ति (When दा is used, the word for the recepient gets the fourth vibhakti).

## अभ्यासः

### मौखिकम्

1. इस पाठ का शुद्ध उच्चारण कीजिए (Read this lesson with correct pronunciation).

2. 'यच्छति' का प्रयोग करते हुए दो वाक्य बनाइए (Make two sentences using the word यच्छति).

## लिखितम्

3. निम्नलिखित शब्दों के अर्थ लिखिए और उन्हें वाक्यों में प्रयुक्त कीजिए (Give meanings of the following words and use them in sentences)—
कुक्कुरः, सप्त, सह, श्वः, अपि, आनयति।

4. रिक्त स्थानों में संख्यावाची शब्द भरिए (Fill in the blanks with numbers)—
पाण्डवा .................... आसन्। मम .................... हस्तौ स्तः। रावणस्य .................... मुखानि आसन्। चन्द्र .................... अस्ति। अश्वस्य .................... चरणाः भवन्ति।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. आप सब सफल हुए। | 1. All of you were successful. |
| 2. आप सबने क्या देखा? | 2. What did all of you see? |
| 3. आप सबने भोजन क्यों नहीं पकाया? | 3. Why did all of you not cook the food? |
| 4. आप सबने वहाँ क्या लिखा? | 4. What did all of you write there? |
| 5. आप सबने मालाएँ गूँथी। | 5. All of you strung garlands. |
| 6. आप सब जीवन में सफल हुए। | 6. All of you were successful in life. |
| 7. क्या आप सब मेरे घर कल आएँगे? | 7. Will all of you come to my house tomorrow? |

अष्टमः पाठः

# लङ्-लकारः

## (उत्तमपुरुषः एकवचनम्)

चिन्त् (चिन्तय्) युक्तिः कृष् उन्नतिः वृष्टिः आसम् सदा समयः क्रीड् आज्ञा पाल् (पालय्) कदापि चुर् (चोरय्)



अहम् अवसम्।
अहम् ग्रामे अवसम्।

अहम् अचिन्तयम्।
अहम् युक्तिम् अचिन्तयम्।



अहम् अकृषम्।
अहम् भूमिम् अकृषम्।

अहम् अतरम्।
अहम् सरोवरे अतरम्।

अहम् तत्र आसम्।
अहम् तत्र गृहे आसम्।

अहम् सदा समये अपठम्, समये च अक्रीडम्। अहम् सदा अम्बायाः जनकस्य आचार्यस्य च आज्ञाम् अपालयम्। रमेशः अपृच्छत्– "किम् त्वम् कदापि अचोरयः?" अहम् रमेशाय अकथयम्– "अहम् कदापि किमपि न अचोरयम्।"

## शब्दार्थाः

| | | | |
|---|---|---|---|
| चिन्त् (चिन्तय्) | = | सोचना | (to think) |
| युक्तिः | = | उपाय | (device) |
| कृष् | = | हल चलाना | (to plough) |
| उन्नतिः | = | उन्नति | (prosperity) |
| वृष्टिः | = | बारिश | (rain) |
| आसम् | = | (मैं) था | (*I* was) |
| सदा | = | हमेशा | (always) |
| समयः | | समय | (time) |
| क्रीड् | = | खेलना | (to play) |
| आज्ञा | = | आज्ञा, हुक्म | (order) |
| पाल् (पालय्) | = | (आज्ञा) मानना | (to obey) |
| कदापि | = | कभी भी | (ever) |
| चुर् (चोरय्) | = | चोरी करना | (to steal) |

**नए धातु (New verb-roots)** – चिन्त् (2), कृष् (1), क्रीड् (1), पाल् (2), चुर् (2)

**नए रूप (New Nouns)** – युक्ति, उन्नति, वृष्टि – *मति के समान* (like मति)

**नए अव्यय (New avyayas)** – सदा, कदापि

**उपपद-विभक्तिः** – कथ् धातु के योग में, जिसको कहा जाए उसके वाचक शब्द में चतुर्थी विभक्ति (When कथ् is used, the word for the person, to whom something is said, gets the fourth vibhakti)

## अभ्यासः

### मौखिकम्

1. क्रीड् धातु के लङ् लकार में रूप बोलिए ( Conjugate क्रीड् in लङ्).
2. 'वृष्टि' शब्द के रूप 'मति' की तरह बोलिए (Decline वृष्टि like मति).

### लिखितम्

3. निम्नलिखित वाक्यों को लङ् लकार के रूपों से पूर्ण कीजिए (Complete the following sentences with लङ् forms) –
   अहम् दुग्धम् ..................... । वृषभः घासम् ..................... । तौ बधिरौ ............ । श्रीकृष्णः वसुदेवस्य पुत्रः ...... । गजः गजैः सह ............... ।
4. हिन्दी में अनुवाद कीजिए (Translate into English)—
   अहम् गृहे आसम्। किम् त्वम् कदापि अचोरयः? अहम् उन्नत्यै अकृषम्। यूयम् सम्पत्तिम् अनाशयत। युवाम् आचार्यम् अवदतम्।
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. मैंने समय पर पत्र लिखा। | 1. I wrote a letter in time. |
| 2. मैंने युक्ति सोची। | 2. I thought of a device. |
| 3. मैंने सदा माता और पिता की आज्ञा का पालन किया। | 3. I always obeyed the order of my parents. |
| 4. मैं राम के साथ सरोवर में तैरा। | 4. I swam in the pool along with Rama. |
| 5. तुम सब बारिश में ठहरे। | 5. All of you stayed in the rain. |

| नवमः पाठः | लङ्-लकारः |
|---|---|

## (उत्तमपुरुषः द्विवचनम्)

**अग्निः गिरिः मुनिः क्रुध् (क्रुध्य्) अरिः आस्व रविः अतिथिः सहोदरः राष्ट्रपतिः समीपे**



आवाम् अपश्याव।
आवाम् मूर्तिम् अपश्याव।

आवाम् अतिष्ठाव।
आवाम् गिरौ अतिष्ठाव।

आवाम् अनमाव।
आवाम् मुनीन् अनमाव।



आवाम् अक्रुध्याव।
आवाम् अरये अक्रुध्याव।

आवाम् तत्र आस्व।
आवाम् प्रातः तत्र आस्व।

अहम् अग्नये अनमंम्।
आवाम् अग्नये अनमाव।

अहम् रवये जलम् अयच्छम्। आवाम् रवये जलम् अयच्छाव।
अहम् तस्य अतिथिः आसम्। आवाम् तस्य अतिथी आस्व।

आवाम् सहोदरौ स्वः। ह्यः आवाम् राष्ट्रपतेः भवनम् अगच्छाव। तत्र आवाम् राष्ट्रपतिम् अपि अपश्याव। भवनस्य समीपे एव एकम् सुन्दरम् उद्यानमपि अस्ति। आवाम् तत् अपि अपश्याव, प्रसन्नौ च अभवाव।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अग्निः | = | आग | (fire) |
| गिरिः | = | पर्वत | (mountain) |
| मुनिः | = | मुनि | (sage) |
| क्रुध् (क्रुध्य्) | = | क्रोध करना | (to get angry) |
| अरिः | = | शत्रु | (enemy) |
| आस्व | | (*हम दो*) थे | (*we two*) were |
| रविः | = | सूर्य | (sun) |
| अतिथिः | = | मेहमान | (guest) |
| सहोदरः | = | सगा भाई | (real brother) |
| राष्ट्रपतिः | = | राष्ट्रपति | (president) |
| समीपे | = | पास | (near) |

**नया धातु (New verb-root)**— क्रुध् (2)

**नए रूप (New Nouns)**— अग्नि, गिरि, मुनि, अरि, रवि, अतिथि, राष्ट्रपति–*मुनि के समान* (like मुनि)

**नया अव्यय (New avyaya)**— समीपे

**उपपद-विभक्तिः**– क्रुध् धातु के साथ, जिस पर क्रोध किया जाए, उसके वाचक शब्द में चतुर्थी विभक्ति (When क्रुध् is used, the word for the person you feel angry at, gets the fourth vibhakti).

## अभ्यासः

### मौखिकम्

1. संस्कृत में उत्तर दीजिए (Answer in Sanskrit) —

   किम त्वम् नगरे वससि ? किम् आवाम् मित्रे आस्व ? किम् वयम् भारते वसामः ? किम् त्वम् दुग्धम् पिबसि ? किम् त्वम् विद्यालयम् गच्छसि ?

2. मुनि शब्द के रूप बोलिए (Decline the word मुनि).

### लिखितम्

3. 'मुनि' की तरह 'रवि' शब्द के रूप लिखिए ( Decline the word रवि like मुनि).
4. नीचे लिखे शब्दों को अपने संस्कृत-वाक्यों में प्रयुक्त कीजिए (Use the following words in Sanskrit sentences)—

   सुन्दरम्, हयः, राष्ट्रपतेः, समीपे, विना, यच्छति।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. हम दोनों पर्वत पर गए। | 1. Both of us went on the mountain. |
| 2. वहाँ एक मन्दिर था। | 2. There was a temple. |
| 3. हम दोनों ने देवता की मूर्ति को नमस्कार किया। | 3. Both of us bowed before the deity idol. |
| 4. हम दोनों ने वहाँ पानी भी पिया। | 4. There both of us drank water too. |
| 5. मेरा मित्र बोला, "मैं प्रसन्न हूँ"। | 5. My friend said, "I am happy" |
| 6. हम दोनों प्रसन्न थे। | 6. Both of us were happy. |

दशमः पाठः

# लङ्-लकारः

## (उत्तमपुरुषः बहुवचनम्)

दण्ड् (दण्डय्) दुष्ट गण (गणय्) वप् बीजम् आस्म सर्वस्वम्



वयम् अदण्डयाम।
वयम् दुष्टान् अदण्डयाम।

वयम् अखेलाम।
वयम् छात्रैः सह अखेलाम।

वयम् अगणयाम।
वयम् अतिथीन् अगणयाम।



वयम् अवपाम।
वयम् बीजानि अवपाम।

वयम् तत्र आस्म।
वयम् अग्नेः समीपे आस्म।

| | | |
|---|---|---|
| अहम् अहसम्। | आवाम् अहसाव। | वयम् अहसाम। |
| अहम् अचलम्। | आवाम् अचलाव। | वयम् अचलाम। |
| अहम् तत्र आसम्। | आवाम् तत्र आस्व। | वयम् तत्र आस्म। |

वयम् छात्राः स्मः। वयम् स्वस्य देशस्य सैनिकाः स्मः। वयम् सदा भारतम् अरक्षाम्, रक्षामः रक्षिष्यामः च। वसम् सैनिकाः देशाय सर्वस्वम् अयच्छाम, यच्छामः दास्यामः च। वयम् देशस्य अरीन् अनाशयाम नाशायामः नाशयिष्यामः च। वयम् कीर्तिम् च अविन्दाम् विन्दामः वेदिष्यामः च।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| दण्ड (दण्डय्) | = | सज़ा देना | (to punish) |
| दुष्ट | = | दुष्ट | (wicked) |
| गण् (गणय्) | = | गिनना | (to count) |
| वप् | = | बोना | (to sow) |
| बीजम् | = | बीज | (seed) |
| आस्म | = | (*हम सब*) थे | (*we*) were |
| सर्वस्वम् | = | सब कुछ | (everything) |

**नए धातु (New verb-roots)**– दण्ड (2), गण् (2), वप् (2)

**नए विशेषण (New Adjectives)**– दुष्टः दुष्टा दुष्टम्

**नया अव्यय (New avyaya)**– सर्वस्वम्

## अभ्यासः

### मौखिकम्

1. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   त्वम् किम नयसि? पुत्रम् विना कः न गच्छति? त्वम् कुत्र पठसि?
   त्वम् प्रातः जनकम् नमसि?

2. पच् धातु के लङ् लकार के रूप बोलिए (Conjugate पच् in लङ्)

## लिखितम्

3. कोष्ठकों में दिए गए शब्दों में ठीक विभक्तियाँ लगाकर रिक्त स्थानों को भरिए। (Add the appropriate vibhakti to the words within parenthesis and complete the sentences)—

(शरीर) .................... रक्तम् भवति।

(नगर) .................... रामः आगच्छति।

(विद्यालय) .................... बालाः पठन्ति।

(ग्राम) .................... मोहनः गच्छति।

(पुत्र) .................... अम्बा दुग्धम् यच्छति।

4. अनुवाद कीजिए (Translate)—

वयम् भारतम् रक्षामः। वयम् छात्रान् अगणयामः। मम भवनस्य समीपे एकम् सुन्दरम् उद्यानम् अस्ति। तत्र आवाम् राष्ट्रपतिम् अपश्याव। हे छात्रौ, युवाम् किमर्थम् अवदतम्?

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. हमने ईश्वर की पूजा की। — We worshipped God.
2. हमने राष्ट्रपति का घर देखा। — We saw the President's house.
3. आप भी राम के घर नहीं गए। — You also did not go to Rama's house.
4. हम दुकान पर ठहरे। — We stayed at the shop.
5. हमने रुपये गिने। — We counted rupees.
6. हम आश्रम में नहीं थे। — We were not in the hermitage.
7. तुम रोज़ सुबह बगीचे में घूमते हो। — Every morning you walk around in the garden.

एकादशः पाठः

# लोट्-लकारः

(प्रथमपुरुषः एकवचनम्)

अधि+गम् (गच्छ्) धनम् उत् + पत् आकाशः अस्तु स्थपतिः परम्



सः नमतु।

सः भक्तः नमतु।

सः भक्तः देवालये नमतु।

सः अधिगच्छतु।

सः श्रमिकः अधिगच्छतु।

सः श्रमिकः धनम् अधिगच्छतु।



सः उत्पततु।

सः खगः उत्पततु।

सः खगः आकाशे उत्पततु।

उन्नतिः अस्तु।

छात्राणाम् उन्नतिः अस्तु।

अम्बा बालाय न क्रुध्यतु। मालाकारः मालाम् गुम्फतु। स्थपतिः भवनम् रचयतु। छात्रः आचार्यम् प्रश्नम् पृच्छतु। आचार्यः छात्राय कथयतु। सौचिकः वस्त्राणि सीव्यतु। यूयम् तत्र प्रतिदिनम् अगच्छत परम् सः गच्छतु। अहम् गायामि, यूयम् अपि गयथ। सा अपि गायतु।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अधि + गम् (गच्छ्) | = | प्राप्त करना | (to get) |
| धनम् | = | धन | (money) |
| उत् + पत् | = | उड़ना | (to fly) |
| आकाशः | = | आसमान | (sky) |
| अस्तु | = | (*वह*) हो | (*he/she/that*) be |
| स्थपतिः | = | राज (मकान बनाने वाला) | (mason) |

**उपसर्ग युक्त धातुएँ (Verb-roots with prefixes)–** अधि + गम् (गच्छ्), उत् + पत्

**नया अव्यय (New avyaya)** परम्

**उपपद विभक्तिः–** प्रच्छ् धातु द्विकर्मक है। **जिससे** पूछें और **जो कुछ** पूछें, दोनों के वाचक शब्द **द्वितीया विभक्ति** में होते हैं। (When **प्रच्छ्** is used, two words get the second vibhakti—word **for whom** you ask, and word for **what** you ask).

## अभ्यासः

### मौखिकम्

1. उत् + पत् तथा अधि+गम् धातुओं के लट् लकार तथा लोट् लकार में रूप लिखिए (Conjugate) उत् + गम् and अधि + गम् in लट् and लोट्).
2. रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks)—
   खगः आकाशे ............ । भक्तः देवम् ........... । ............... भवनम् रचयतु। मालाकारः ............ गुम्फतु। आचार्यः ........... कथयतु। छात्रः ............... पृच्छतु।

## लिखितम्

3. कोष्ठकों में दी हुई दो-दो क्रियाओं में से उचित क्रिया लेकर वाक्य पूर्ति कीजिए (Choose the correct form from the parenthesis)—

खगः ........................ (उत्पततु/सीव्यतु)।

भक्तः देवालये ........................ (नमतु/क्रुध्यतु)।

मालाकारः मालाम् ........................ (सीव्यतु/गुम्फतु)।

अध्यापकः छात्राय ........................ (कथयतु/नमतु)।

स्थपतिः भवनम् ........................ (गुम्फतु/रचयतु)।

4. इस पाठ के अन्तिम पाँच वाक्यों का अनुवाद कीजिए। (Translate the last five sentences of this lesson).

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. यह पक्षी आकाश में उड़े। | 1. This bird should fly in the sky. |
| 2. राम मन्दिर में नमस्कार करे। | 2. Ram should bow in the temple. |
| 3. पिता बेटे पर क्रोध न करे। | 3. The father should not be angry at (his) son. |
| 4. छात्र माला गूँथे। | 4. The student should string garland. |
| 5. तुम वहाँ रोज नहीं गये। | 5. You did not go there every day. |
| 6. किसान ने खेतों में बीज बोए। | 6. The farmer sowed seeds in the fields. |

द्वादशः पाठः

# लोट्-लकारः

## (प्रथमपुरुषः द्विवचनम्)

**आरक्षकः स्ताम् कक्षा उपवनम् अध्यापकः पाठय् यज्**

एते नयताम्।
एते बालिके नयताम्।
एते बालिके पुस्तकानि नयताम्।



एतौ दण्डयताम्।
एतौ आरक्षकौ दण्डयताम्।
एतौ आरक्षकौ दुष्टान् दण्डयताम्।

एतौ खनताम्।
एतौ श्रमिकौ खनताम्।
एतौ श्रमिकौ भूमिम् खनताम्।



एतौ तत्र स्ताम्।
एतौ बालौ अत्र स्ताम्।
एतौ बालौ कक्षायाम् स्ताम्।

एषः बालः नमतु। एतौ बालौ नमताम्।
एषा बाला पठतु। एते बाले पठताम्।
एषः वीराः अस्तु। एतौ वीरौ स्ताम्।

एतौ सेवकौ बालान् रक्षताम्। एतौ मयूरौ उपवने नृत्यताम्। एषः गायकः एषा गायिका च गायताम्। एषः छात्रः एषा छात्रा च देवम् अर्चताम्। एषः अध्यापकः एषा अध्यापिका च पाठयताम्। एतौ मुनी आश्रमे यजताम्। एतौ पथिकौ प्रातः चलताम्। वयम् अपि पथिकैः सह गमिष्यामः। आवाम् तानि रूप्यकाणि गणयामः। सः अपि तानि गणयतु। एतौ भक्तौ प्रातः देवालये स्ताम्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आरक्षकः | = | सिपाही | (policeman) |
| स्ताम् | = | *(वे दोनों)* हों | (*may they two*) be |
| कक्षा | = | कक्षा | (class) |
| उपवनम् | = | बाग | (garden) |
| अध्यापकः | = | अध्यापक | (teacher) |
| पाठ्य | = | पढ़ाना | (to teach) |
| यज् | = | यज्ञ करना | (to worship) |

**नए धातु (New verb-roots)** – पाठ्य (1), यज् (2)

**नए रूप (New Noun & Pronoun)** – कक्षा – *लता के समान* (like लता)

एतत् – *तद् के समान* (like तद्)

## अभ्यासः

### मौखिकम्

1. नीचे लिखी क्रियाओं के साथ कर्त्ता लगाइये। (Add subject form to the following verbs)—

खनताम्, गमिष्यामः, नयताम्, रचयतु, नमत, अगच्छन्, सीव्यतु, गायताम्

2. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—

तौ मयूरौ कुत्र नृत्यताम्?
एषः खगः कत्र उत्पततु?
एतौ मुनी कुत्र यजताम्?
एतौ श्रमिकौ किम् खनताम्?
सः छात्रः आचार्यम् किम् पृच्छतु?

## लिखितम्

3. तीन स्तम्भों से एक एक शब्द लेकर वाक्य बनाइये (Make sentences. Take one word from each column to construct a sentence)—

| | | |
|---|---|---|
| एषः | एव | वदावः |
| वयम् | कदा | अर्चताम् |
| एतौ | अत्र | पठसि |
| त्वम् | तत्र | गमिष्यामः |
| अहम् | न | |
| आवाम् | कुत्र | गायामि |

4. इन वाक्यों को ठीक क्रम में लिखिए (Re-arrange in the correct word order)—

गणयतु अपि सः तानि। देवालये स्ताम् भक्तौ प्रातः। फलानि आवाम् तानि गणयावः। वसन्ति च आश्रमेषु कृषकाः तापसाः ग्रामेषु। न सः पठतु तत्र।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. हम अध्यापकों के साथ जायेंगे।
2. यह मुनि आश्रम में यज्ञ करे।
3. वे लड़कियाँ बाग में नाचें।
4. यह श्रमिक सुबह चले।
5. ये दो छात्र कक्षा में हों।
6. वे दो पुरुष यहाँ न आएँ।

1. We will go with the teachers.
2. This sage should perform sacrificial worship in the hermitage.
3. Those girls should dance in the garden.
4. This labourer should go in the morning.
5. These two students should be in the class.
6. Those two men should not come here.

त्रयोदशः पाठः

# लोट्-लकारः

## (प्रथमपुरुषः बहुवचनम्)

**चुम्ब् सन्तु कविता कविः श्रावय् सत्यम् अद्य तरणम् प्रतियोगिता भोः**



एते खेलन्तु।
एते छात्राः खेलन्तु।
एते छात्राः परस्परम् क्षेत्रे खेलन्तु।

एते लिखन्तु।
एते लेखकाः लिखन्तु।
एते लेखकाः कथाः लिखन्तु।



एताः चुम्बन्तु।
एताः अम्बाः चुम्बन्तु।
एताः अम्बाः पुत्रान् कन्याः च चुम्बन्तु।

एते वीराः सन्तु।
एते बालकाः वीराः सन्तु।

दुष्टः नश्यतु।
फलम् पततु।

दुष्टौ नश्यताम्।
फले पतताम्।

| | |
|---|---|
| धनिकः धनम् यच्छतु। | फलम् मधुरम् अस्तु। |
| धनिकौ धनम् यच्छताम्। | फले मधुरे स्ताम्। |
| धनिकाः धनम् यच्छन्तु। | फलानि मधुराणि सन्तु। |

वीराः अरीन् नाशयन्तु। कवयः कविताः श्रावयन्तु। भक्ताः देवान् अर्चन्तु। देवाः भक्तान् रक्षन्तु। छात्राः सदा सत्यम् वदन्तु। ते आचार्याणाम् आज्ञाम् पालयन्तु। कृषकाः वृषभान् गवेषयन्तु।

अद्य अत्र तरणस्य प्रतियोगिता भविष्यति। जनाः अत्र आगच्छन्तु तिष्ठन्तु च। भोः बालकाः, किम् यूयम् अपि अत्र आगमिष्यथ?

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अम्बा | = | माँ | (mother) |
| चुम्ब् | = | चूमना | (to kiss) |
| सन्तु | = | *(वे सब)* हों | (*may they*) be |
| कविता | = | कविता | (poem) |
| कविः | = | कवि | (poet) |
| श्रावय् | = | सुनाना | (to tell) |
| सत्यम् | = | सच | (truth) |
| अद्य | = | आज | (today) |
| तरणम् | = | तैरना | (swimming) |
| प्रतियोगिता | = | मुकाबला | (competition) |
| भोः | = | अरे | (hey, oh) |

**नए धातु (New verb roots)**— चुम्ब् (1), श्रावय् (1)

**नए रूप (New Nouns)**— कविता, प्रतियोगिता– *लता के समान* ( like लता)

**नए अव्यय (New avyayas)**— अद्य भोः

## अभ्यासः

### मौखिकम्

1. कोष्ठकों में दिए शब्दों से वाक्य-पूर्ति कीजिए (Fill in the blanks)—

   देवाः (भक्त) रक्षन्तु। ते आचार्याणाम् (आज्ञा) पालयन्तु। सरोवरे (कमल) भवन्ति। नगरे (कवि) आगमिष्यन्ति। सः मम (मित्र) अस्ति।

2. चुम्ब् और श्रावय् के रूप लट्, लृट्, लङ् और लोट् में बोलिए (Conjugate चुम्ब् and श्रावय् in लट्, लृट्, लङ्, and लोट्).

### लिखितम्

3. निम्नलिखित शब्दों को संस्कृत–वाक्यों में प्रयुक्त कीजिए (Use the following in Sanskrit sentences)

   सह, अपि, गच्छामि, तस्मै, मधुरम्, मालाम्, ह्यः, श्वः

4. निम्नलिखित रूपों के मूल शब्द विभक्ति तथा वचन लिखिए (Give the base form, vibhakti and number)

   (उदाहरण – **भक्तान्** – भक्त शब्द, द्वितीया विभक्ति, बहुवचन)

   कृषकाः, छात्राय, आकाशे, मयूरौ, मुनी, फलानि, पथिकैः

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

   1. वे सदा सत्य बोलें। — They should always tell the truth.
   2. वे भी यहाँ पढ़ें। — They should also study here.
   3. भक्त सवेरे ईश्वर को याद करें। — Devotees should remember God in the morning.
   4. वे भी कथा लिखें। — They should also write a story.
   5. छात्र अध्यापकों से प्रश्न पूछें। — Students should ask (their) teachers questions.

चतुर्दशः पाठः

# लोट्-लकारः

## (मध्यमपुरुषः एकवचन)

एधि यतः मधुरम् (*क्रियाविशेषण*) अनुजः मा बुभुक्षित



त्वम् यच्छ।
त्वम् भोजनम् यच्छ।

त्वम् आनय।
त्वम् जलम् आनय।



त्वम् पश्य।
त्वम् वेदान् पश्य।

त्वम् प्राज्ञः एधि।
त्वम् संस्कृते प्राज्ञः एधि।

## वार्तालापः

मोहनः— तम् पश्य। सः मम मित्रम् अस्ति। त्वम् तस्मै अपि फलानि यच्छ।

राकेशः— अहम् तस्मै फलानि न दास्यामि। यतः सः मधुरम् न वदति। त्वम् फलानि अधिगच्छ।

मोहनः— किम् त्वम् स्मरसि यत्: ह्यः सः तव अनुजम् अरक्षत्। अतः त्वम् तेन सहः मधुरम् वद। मा गर्व। सः बुभुक्षितः अस्ति। तस्मै फलानि यच्छ। एवम् मित्रम् मित्रम् रक्षतु।

राकेशः— आम्, यच्छामि।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| एधि | = | (*तुम एक*) होवो | (*may you*) be (*singular*) |
| यतः | = | क्योंकि | (because) |
| मधुरम् | = | मीठी तरह | (in a sweet manner) |
| अनुजः | = | छोटा भाई | (younger brother) |
| मा | = | मत | (not) |
| बुभुक्षित | = | भूखा | (hungry) |

**नया रूप (New pronoun)** — तद् (देखिए पृष्ठ 88 – 89)

**नया विशेषण (New adjective)**— बुभुक्षितः बुभुक्षिता बुभुक्षितम्

**नए अव्यय (New avyays)** – मधुरम्, मा

## अभ्यासः

### मौखिकम्

1. काले छपे शब्दों के स्थान पर उचित शब्द बताइए (Give appropriate form in place of bold words)—

मयूरः **जले** नृत्यति। मत्स्यः **वृक्षे** तरतु। सिंहः **वृक्षे** गर्जति। तापसाः **छात्रावासे** वसन्ति। भ्रमरः **देवालये** तिष्ठति।

2. दो छात्र मिलकर मोहन और राकेश के वार्तालाप का अभिनय करें (Two stuents should role-play the conversation between Mohan and Rakesh).

## लिखितम्

3. संस्कृत में उत्तर लिखिए (Answer in Sanskrit)—
त्वम् किम् स्मरसि ? त्वम् तस्मै किम् न दास्यसि ? लेखकाः किम् लिखन्तु ? छात्राः कुत्र क्रीडन्तु ? पथिकौ कदा अचलताम् ?
4. इस पाठ के वार्तालाप अंश का हिन्दी में अनुवाद कीजिए (Translate the conversation part of this lesson in English).
5. (क) फलम् मधुरम् अस्ति। सः मधुरम् वदति।
इन दोनों वाक्यों में 'मधुर' शब्द के प्रयोग में क्या अन्तर है (Explain difference in the use of मधुरम् in the above two sentences).
(ख) मित्रम् मित्रम् रक्षतु।
इस वाक्य में पहले 'मित्रम्' शब्द और दूसरे 'मित्रम्' शब्द में क्या अन्तर है (Explain the difference in the two uses of मित्रम्).
6. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. मैं उसको फल दूँगा। | 1. I will give him fruits. |
| 2. राम श्याम का दोस्त है। | 2. Ram is Shyam's friend. |
| 3. तू भी फल ला। | 3. You also bring fruits. |
| 4. कल तूने मेरे छोटे भाई की रक्षा की। | 4. Yesterday, you protected my younger brother. |
| 5. वह अब भूखा नहीं है। | 5. He is not hungry now. |



पंचदशः पाठः

# लोट्-लकारः

## (मध्यमपुरुषः द्विवचनम्)

शान्तिः स्तम् विनम्र चिरम् जीव् पंक्तिः किञ्चित् खादित्वा ध्यानम् आ+कर्णय सायम् क्रीडनम् आवश्यक जनः



युवाम् खड्गम् विन्दतम्।
युवाम् वीरौ स्तम्।

युवाम् शान्तिम् वाञ्छतम्।
युवाम् उन्नतिम् वाञ्छतम्।



युवाम् न क्रन्दतम्।
युवाम् चिरम् न क्रन्दतम्।

युवाम विनम्रौ स्तम्।
युवाम् प्राज्ञौ स्तम्।

| | |
|---|---|
| त्वम् चिरम् जीव। | युवाम् चिरम् जीवतम्। |
| त्वम् पंक्तौ तिष्ठ। | युवाम् पंक्तौ तिष्ठतम्। |
| त्वम् स्वस्थः एधि। | युवाम् स्वस्थौ स्तम्। |



जनकः अवदत्–भोः पुत्रौ, किंचित् खादित्वा विद्यालयम् गच्छतम्। तत्र गत्वा आचार्यान् नमतम्। कक्षायाम् स्वैः मित्रैः सह मधुरम् वदतम्। कक्षायाम् पाठम् ध्यानेन आकर्णयतम् स्मरतम् च। तत्र पठित्वा लिखित्वा च सायम् गृहम् आगच्छतम्। अत्र परस्परम् क्रीडतम्। क्रीडनम् अपि आवश्यकम् अस्ति। तेन जनः स्वस्थः भवति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| शान्तिः | = | शान्ति | (peace) |
| स्तम् | = | (*तुम दो*) हो | (*may you two*) be |
| विनम्र | = | नम्र | (humble) |
| चिरम् | = | चिरकाल तक | (for a long time) |

| | | | |
|---|---|---|---|
| जी़व् | = | जीना | (live) |
| पंक्तिः | = | कतार, लाइन | (line) |
| खादित्वा | = | खाकर | (having eaten) |
| ध्यानम् | = | ध्यान | (attention) |
| आ + कर्णय् | = | सुनना | (to listen) |
| सायम् | = | शाम को | (in the evening) |
| क्रीडनम् | = | खेलना | (playing) |
| आवश्यक | = | जरूरी | (necessary) |
| जनः | = | मनुष्य | (person) |

**नया धातु (New verb-root)— जीव (1)**

**उपसर्ग-युक्त धातु (New-root with prefix) – आ+कर्णय्**

**नए रूप (New nouns) – शान्ति, पंक्ति – *मति के समान* (like मति)**

**नए अव्यय (New avyayas)—**

(क) चिरम्, सायम् (ख) खादित्वा = खाद् + क्त्वा, गत्वा = गम् + क्त्वा, पठित्वा=पठ+क्त्वा, लिखित्वा=लिख्+क्त्वा।

**नए विशेषण (New Adjectives) –**

| | | |
|---|---|---|
| विनम्रः | विनम्रा | विनम्रम् |
| आवश्यकः | आवश्यकी | आवश्यकम् |

## अभ्यासः

### मौखिकम्

1. इस पाठ का शुद्ध उच्चारण कीजिए (Read this lesson with correct pronunciation).
2. निम्नलिखित धातुओं के साथ 'क्त्वा' प्रत्यय लगाकर रूप बनाइए और उनका उच्चारण कीजिए (Add क्त्वा and pronounce the new forms)—

(उदाहरण – पठ् + क्त्वा = पठित्वा)

खाद, रक्ष्, चल्, हस्, धाव्, पत्, खेल्, भ्रम्।

## लिखितम्

3. नीचे लिखे शब्दों को यथास्थान रखकर वाक्य-पूर्ति कीजिए (Fill in the appropriate word and complete the sentences)–

   खादित्वा, पठित्वा, नत्वा, लिखित्वा, गत्वा, भोजनम्

   त्वम् पाठम् ............... गच्छ। यूयम् आचार्यम् ............ पठत। युवाम् विद्यालयम् ............ पठतम्। त्वम् फलानि ............... आगच्छ। यूयम् पत्रम् ............... खादत।

4. इस पाठ के दूसरे भाग का हिन्दी में अनुवाद लिखिए (Translate the second part of the lesson in English).

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. तुम दोनों क्या बोल रहे हो? | 1. What are both of you saying ? |
| 2. तू यहाँ ध्यान से खेल। | 2. You play here carefully. |
| 3. तुम सब फल खाकर स्कूल जाओ। | 3. All of you eat fruits and go to school. |
| 4. विद्यालय के आचार्यों को प्रणाम करो। | 4. Greet (your) school teachers. |
| 5. तू वहाँ पढ़कर घर आ। | 5. You study there and then come home. |

षोडशः पाठः

# लोट्-लकारः

## (मध्यमपुरुषः बहुवचनम्)

**प्रति + वद्   वि + हृ (हर्)   उत् + स्था (तिष्ठ्)   स्त**

**नीरोग   जन्म-दिवसः   जलपानम्   नूनम्   एव**



यूयम् प्रतिवदत।
भोः छात्राः, यूयम् प्रतिवदत।

यूयम् विहरत।
यूयम् उद्यानेषु वनेषु च विहरत।

यूयम् उत्तिष्ठत।
आचार्यान् दृष्टवा यूयम् उत्तिष्ठत।

यूयम् प्रसन्नाः स्त।
यूयम् विनम्राः स्त।
यूयम् प्राज्ञाः स्त।



त्वम् कथाम् श्रावय।
यूवाम् कथाम्  श्रावयतम्।
यूयम् कथाम् श्रावयत।

त्वम् नीरोगः एधि।
युवाम् नीरोगौ स्तम्।
यूयम् नीरोगाः स्त।

त्वम् पाठम् स्मर।

युवाम् पाठम् स्मरतम्।

यूयम् पाठम् स्मरत।



अशोकः— भोः मित्राणि, यूयम् अद्य सायम् मम गृहम् आगच्छत। अद्य मम जन्मदिवसः अस्ति।

बालकाः— तत्र किम् भविष्यति?

अशोकः— तत्र जलपानम् भविष्यति। वयम् तत्र खादिष्यामः, पास्यामः, परस्परम् खेलिष्यामः च। एवम् खादित्वा पीत्वा च वयम् प्रसन्नाः भविष्यामः।



बालकाः— भोः अशोक, जयन्तः अत्र न अस्ति। किम् सः अपि आगमिष्यति?

अशोकः— सायम् तम् अपि यूयम् आनयत।

बालकाः— आम्, वयम् नूनम् एव आगमिष्यामः, तम् अपि च तत्र आनेष्यामः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| प्रति + वद् | = | उत्तर देना | (to answer) |
| वि + हृ (हर्) | = | घूमना | (to walk around) |
| उत् + स्था (तिष्ठ) | = | उठ खड़ा होना | (to stand up) |

| | | | |
|---|---|---|---|
| स्त | = | (*तुम सब*) होवो | (*may you all*) be |
| नीरोग | = | रोगरहित, स्वस्थ | (healthy) |
| जन्म-दिवसः | = | जन्म-दिन | (birthday) |
| जलपानम् | = | जलपान | (party, refreshments) |
| नूनम् | = | अवश्य | (definitely) |
| एव | = | ही | (*for emphasis*) |

**उपसर्ग-युक्त धातु (Verb-roots with prefix)**— प्रति + वद्, वि + हृ, उत् + स्था

**नये अव्यय (New avyayas)**— (क) नूनम् (ख) खादित्वा = खाद् + क्त्वा, पीत्वा = पा + क्त्वा।

**नया विशेषण** (New adjective) —नीरोगः नीरोगा नीरोगम्

## अभ्यासः

### मौखिकम्

1. नीचे लिखी धातुओं के लोट्-लकार रूप बताइए और उनका शुद्ध उच्चारण कीजिए (Give the लोट् forms and pronounce them correctly)—
अस् पा, आ + गम्, आ + नी, उप + विश, वाञ्छ्, भू, स्मृ।
2. ठीक क्रिया चुनिए (Choose the correct verb-form)—
वयम् (पठिष्यामः/पठिष्यावः)। त्वम् (उत्तिष्ठ/उत्तिष्ठत)। अशोकः जयन्तः च (विहरतु/विहरताम्)। अद्य रामस्य जन्म-दिवसः (असि/अस्ति)। तत्र गत्वा आचार्यान् यूयम् (नमथ/नमत)।

### लिखितम्

3. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
अद्य अशोकस्य गृहे किम् अस्ति? अशोकस्य जन्म-दिवसे किम् भविष्यति? किम् यूयम् अशोकस्य गृहम् गमिष्यथ? किम् तत्र जयन्तः अपि गमिष्यति? किम् तत्र जलपानम् भविष्यति?

4. निम्नलिखित शब्दों को अपने वाक्यों में प्रयुक्त कीजिए (Use the following words in sentences)—

पास्यामः, अद्य नीरोगौ, दृष्ट्वा, आगच्छतु, मम, परस्परम्, पीत्वा।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. कल श्याम का जन्म-दिन होगा। | 1. Shyam's birthday will be tomorrow. |
| 2. वहाँ हम कुछ पियेंगे और कुछ खायेंगे। | 2. There we will drink and eat something. |
| 3. हम खाकर और पीकर खेलेंगे। | 3. We will eat and drink and then play. |
| 4. हाँ, मैं अवश्य ही जाऊँगा। | 4. Yes, I will certainly go. |
| 5. क्या जयन्त भी जायेगा? | 5. Will Jayant also go? |



❐❐

सप्तदशः पाठः

# लोट् - लकारः

## (उत्तमपुरुषः एकवचनम्)

असानि प्र + विश् उप + विश् अर्थकिम्

अहम् आगच्छानि ?
किम् अहम् सायम् आगच्छानि ?



अहम् आनयानि ?
किम् अहम् जलम् आनयानि ?

अहम् पिबानि ?
किम् अहम् औषधम् पिबानि ?



अहम् वीरः असानि।
अहम् सैनिकः असानि।
अहम् प्राज्ञः असानि।

## वार्त्तालापः

छात्रः— गुरुदेव, किम् अहम् कक्षायाम् प्रविशानि?

शिक्षकः— भोः रमेश, आगच्छ, अत्र उपविश च।

छात्रः— गुरुदेव, अत्र स्थित्वा अहम् पठितुम् वाञ्छामि। किम् अहम् संस्कृतम् पठानि?

शिक्षकः— अथकिम्, अत्र छात्राः पठितुम् एव आगच्छन्ति। त्वम् अपि पठ।

छात्रः— तत् सत्यम्। परम् आचार्यस्य आज्ञा आवश्यकी भवति। उपविशामि।

शिक्षकः— किम् अहम् अद्य कथाम् श्रावयाणि?

छात्रः— आम्, गुरुदेव।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| असानि | = | (मैं) होऊँ | (*may I*) be |
| प्र + विश् | = | प्रवेश करना | (to enter) |
| उप + विश् | = | बैठना | (to sit) |
| अथ किम् | = | और क्या, हाँ | (yes) |

**उपसर्ग-युक्त धातु (verb-root with prefix)**— प्र + विश्, उप + विश्

**नए अव्यय (New avyayas)**—

(क) अथ किम् (ख) स्थित्वा = स्था + क्त्वा, प्रविश्य = प्र + विश् + ल्यप्

उपविश्य = उप + विश् + ल्यप्

(ग) पठितुम् = पठ + तुमुन्

**विशेषः—** धातु के पूर्व उपसर्ग हो तो क्त्वा के स्थान पर ल्यप् लगता है (If there is a prefix before a verb-root use ल्यप् instead of क्त्वा).

# अभ्यासः

## मौखिकम्

1. ऐसे प्रश्न बताइए जिनके उत्तर निम्नलिखित हों (Make questions to the following answers)—

   भोः रमेश, त्वम् अत्र उपविश। आम्, त्वम् पठ। मम गृहे कुक्कुरः अस्ति। यूयम् तम् अपि आनयत।

2. इस पाठ के वार्त्तालाप का शुद्ध उच्चारण कीजिए (Read the conversation part of this lesson with correct pronunciation).

## लिखितम्

3. इस पाठ के 'वार्त्तालाप' अंश का हिन्दी में अनुवाद कीजिए (Translate the conversation part of the lesson in English).

4. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—

   छात्राः किमर्थम् विद्यालयम् आगच्छन्ति ? अध्यापकः रमेशम् किम् वदति ? तव किम् नाम अस्ति ? किम् त्वम् प्रतिदिनम् विद्यालयम् गच्छसि ?

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. हे बालको! यहाँ आओ और बैठो। | 1. Hey kids, come here and sit. |
| 2. यहाँ मैं पढ़ने के लिए आता हूँ। | 2. I come here to study. |
| 3. क्या मैं बैठ जाऊँ ? | 3. May I sit down ? |
| 4. क्या हम दोनों दूध पिएँ ? | 4. Should both of us drink milk ? |
| 5. क्या तुम आज पढ़ना नहीं चाहते हो ? | 5. Don't you want to study today ? |

❑ ❑

अष्टादशः पाठः

# लोट्-लकारः

(उत्तमपुरुषः द्विवचनम्)

शक्तिः  असाव  नाटकम्  नवनीतम्



आवाम् गणयाव ?
किम आवाम् छात्रान् गणयाव ?

आवाम् वपाव ?
किम् आवाम् बीजानि वपाव ?



आवाम् विन्दाव ?
किम् आवाम् धनम् विन्दाव ?

आवाम् नाटके किम् असाव ?
आवाम् नाटके तापसौ असाव ?

किम् अहम् निबन्धम् लिखानि ?
किम् अहम् भूमिम् खनानि ?

किम् आवाम् निबन्धम् लिखाव ?
किम् आवाम् भूमिम् खनाव ?

किम् अहम वीरः असानि? किम् आवाम् वीरौ असाव? किम् अहम् शक्तिम् विन्दानि? किम् आवाम् शक्तिम् विन्दाव?

## वार्त्तालापः



बालकौ – अम्बिके, किम् अधुना आवाम् क्रीडाव?

अम्बा – पठित्वा किञ्चित् नवनीतम् खादतम्, तदा क्रीडतम्।

बालकौ – किम् क्रीडित्वा आवाम् पठाव?

अम्बा – गच्छतम्, मा चिरम् क्रीडतम्।

सैनिकौ – किम् आवाम् द्वौ एव तान्, दुष्टान नाशयाव?

जनाः – तान् मा नाशयतम् तान् दण्डयतम् एव।

सैनिकौ – किम् आवाम् स्वानि शस्त्राणि आनयाव, अथवा हस्ताभ्याम् एव तान् दण्डयाव?

## शब्दार्थाः

| | | | |
|---|---|---|---|
| शक्तिः | = | बल | (strength) |
| असाव | = | (*हम दो*) हों | (*may we two*) be |
| नाटकम् | = | नाटक | (drama) |
| नवनीतम् | = | मक्खन | (butter) |

**नया रूप (New noun)**— शक्ति – *मति के समान* ( like मति)

**नया अव्यय (New avyaya)**— क्रीडित्वा = क्रीड् + क्त्वा

## अभ्यासः

### मौखिकम्

1. निम्नलिखित धातुओं के लोट् और लङ् लकारों में रूप पढ़िये ( Conjugate in लोट् and लङ्) –
   अस्, क्रीड, खन्, पा, गम्।
2. निम्नलिखित का अपने वाक्यों में प्रयोग कीजिए (Use the following in sentences)—
   पठ, पठानि, स्थित्वा, पिबाव, अधुना, च, सायम्।

### लिखितम्

3. नीचे के कालमों से शब्द लेकर वाक्य बनाइए (Take words from different columns and construct sentences)—

| | | |
|---|---|---|
| त्वम् | पुस्तकम् | लिखामि, लिखसि |
| सः | पत्रम् | पठामि, पठसि |
| अहम् | लेखम् | लिखति, पठति |

4. वाक्य पूर्ति कीजिए (Fill in the blanks)—
   ...... सह बालः गच्छति। धनिकः .......... भोजनम् यच्छति। अम्बा .......... फलम् आनयति! युवाम् .......... क्रन्दतम्। स्वास्थ्याय .......... आवश्यकम्।
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

   1. तू भी अब पढ़ और लिख?
   2. क्या मैं खेल कर पढ़ूँ?
   3. क्या हम निबन्ध लिखें?
   4. वे भी प्रश्नों को पूछें?
   5. क्या तुम भी मित्रों के साथ खेलोगे?

   1. Now you also read and write ?
   2. Should I play then study ?
   3. Should we write an essay ?
   4. They should also ask questions ?
   5. Will you also play with friends ?

नवदशः पाठः

# लोट्-लकारः

## (उत्तम पुरुषः बहुवचनम्)

क्षल् (क्षालय्) असाम चतुर नागरिकः युष्मद् व्याधिः पीडा अनु + भू (भव्) षोडश

वयम् वस्त्राणि क्षालयाम।
किम वयम् वस्त्राणि क्षालयाम?



वयम् मालाः धारयाम।
किम् वयम् मालाः धारयाम?

वयम् कुक्कुरेभ्यः त्रस्याम।
किम् वयम् कुक्करेभ्यः त्रस्याम?



वयम् चतुराः न असाम।
किम् वयम् चतुराः न असाम?

अहम् नृत्यानि। आवाम् नृत्याव। वयम् नृत्याम। अहम् पृच्छानि। आवाम् पृच्छाव। वयम् पृच्छाम। अहम् प्राज्ञः असानि। आवाम् प्राज्ञौ असाव। वयम् प्राज्ञाः असाम।

## वार्त्तालापः

आरक्षकाः – किम् वयम् आरक्षकाः नागरिकान् रक्षाम ?

नागरिकाः – अथ किम्, यूयम् रक्षत।

स्थपतयः – भोः जनाः, किम् वयम् युष्माकम् भवनानि रचयाम ?

जनाः – आम्, यूयम् भवनानि रचयत।

वैद्याः – हे नराः, किम् वयम् व्याधिम् हराम ?

नराः – आम्, यूयम् व्याधिम् हरत। वयम् शरीरे पीडाम् अनुभवामः।

वैद्याः – उपविशत।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| क्षल् (क्षालय्) | = | धोना | (to wash) |
| असाम | = | (*हम*) हों | (*may we*) be |
| चतुर | = | चतुर | (clever) |
| नागरिकः | = | नागरिक | (citizen) |
| व्याधिः | = | बीमारी | (disease, sickness) |
| पीड़ा | = | दर्द | (pain) |
| अनु + भू (भव्) | = | अनुभव करना | (to feel) |
| षोडश | = | सोलह | (sixteen) |

**नया धातु (New verb-root)**— क्षल् (क्षालय्) (2)

**उपसर्ग-युक्त धातु (Verb-root with prefix)**— अनु + भू

**नए रूप (New pronoun & Noun)**—

युष्मद्

व्याधि– *'मुनि' के समान,* (like मुनि), पीड़ा – *'लता' के समान* (like लता)

**नया विशेषण (New Adjective)**— चतुरः चतुरा चतुरम्

## अभ्यासः

### मौखिकम्

1. संस्कृत में समानार्थक बताइए (Give Sanskrit equivalents)—
सिपाही, शहरी, हाँ, हाथ, पढ़ने के लिए, आओ, आज, ज़रूर, जाकर, कुछ।

2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks with the following words)—
चन्द्रस्य, चन्द्राय, चन्द्रम्, हे चन्द्र
अहम् ........................ पश्यामि। ........................ प्रकाशः शीतलः भवति। जनाः ........................ जलम् यच्छन्ति। ........................ वयम् त्वाम् नमामः।

### लिखितम्

3. ऐसे प्रश्न बनाइए जिनके उत्तर निम्नलिखित हों (Construct questions to which following are the answers)—
आम्, अहम् शरीरे पीडाम् अनुभवामि। न, सः कुक्कुरात् न त्रस्यति। त्वम् अवश्यम् विद्यालयम् गच्छ। अहम् प्रातः विद्यालयम् गच्छामि। अहम् तत्र पठितुम् गच्छामि।

4. इस पाठ के 'वार्त्तालाप' अंश का अनुवाद लिखिए (Translate the conversational part of this lesson).

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. मेरे शरीर में दर्द है। | 1. I have a pain in my body. |
| 2. हाँ, तुम दोनों भी मकान बनाते हो। | 2. Yes, both of you too build houses. |
| 3. तुम दोनों पढ़कर खाना खाओ। | 3. Both of you study and then eat food. |
| 4. क्या मैं भी बीज बोऊँ? | 4. Should I too sow the seeds ? |
| 5. क्या वे भी अपने वस्त्र ले आये? | 5. Did they too bring their clothes ? |
| 6. क्या मैं भी यहाँ खेलूँ? | 6. May I too play here ? |

विंशतितमः पाठः

# मम विद्यालयः

सर्व अस्मद् आदरः कृ अनुशासनम् प्राचार्यः चत्वारिंशत् प्रत्येकम् त्रिंशत् पिण्डीकृत्य पंचाशत् तरण-सरोवरः

मम विद्यालयः सुन्दरः अस्ति। तत्र अनेके छात्राः पठन्ति। विद्यालये अनेके अध्यापकाः अनेकाः अध्यापिकाः च सन्ति। ते छात्रान् पठयन्ति। आचार्याणाम् हृदयेषु स्नेहः अस्ति। ते सर्वैः छात्रैः सह स्नेहेन मिलन्ति पाठयन्ति च। अस्माकम् विद्यालये छात्राः अपि विनम्राः सन्ति। ते आचार्याणाम् आदरम् कुर्वन्ति। यः छात्रः विद्यालयस्य अनुशासनम् न पालयति, अध्यापकः तम् दण्डयति।



अस्माकम् विद्यालये एकः प्राचार्यः अस्ति, चत्वारिंशत्, च अध्यापकाः सन्ति। प्रत्येकम् कक्षायाम् त्रिशत् छात्राः भवन्ति। अस्मिन् विद्यालये पिण्डीकृत्य पंचाशत् बालिकाः सन्ति।

अस्माकम् विद्यालये एकः तरण-सरोवरः अपि अस्ति। वयम् तत्र तरामः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अनेक | = | अनेक | (many) |
| हृदयम् | = | दिल | (heart) |
| स्नेहः | = | प्रेम | (affection) |
| मिल् | = | मिलना | (to meet) |
| सर्व | = | सब | (all) |
| अस्मद | = | हम | (we) |
| आदरः | = | सम्मान | (respect) |
| कृ | = | करना | (to do) |
| यः | = | जो | (one who) |
| अनुशासनम् | = | अनुशासन | (discipline) |
| प्राचार्यः | = | मुख्याध्यापक | (Principal) |
| चत्वारिंशत् | = | चालीस | (forty) |
| प्रत्येकम् | = | प्रत्येक | (every) |
| त्रिंशत् | = | तीस | (thirty) |
| पिण्डीकृत्य | = | कुल मिलाकर | (in all) |
| पंचाशत् | = | पचास | (fifty) |
| तरण-सरोवरः | = | तैरने का तालाब | (swimming pool) |

**नए धातु (New verb-roots)** — कृ (3), मिल् (1)

**नए रूप (New Pronouns)** — अनेक, सर्व तद् के समान (like तद्)
अस्मद्

**नए अव्यय (New avyayas)** — प्रत्येकम्, पिण्डीकृत्य

## अभ्यासः

### मौखिकम्

1. निम्नलिखित शब्दों को संस्कृत-वाक्यों में प्रयुक्त कीजिए (Use the following words in Sanskrit sentences)
पिण्डीकृत्य, पंचाशत्, विनम्राः, स्नेहः, पाठयन्ति, सुन्दरः, प्राचार्यः, अनेके।

2. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—

युष्माकम् विद्यालये अध्यापकाः किम् कुर्वन्ति ? किम् छात्राः आचार्याणाम् आदरम् कुर्वन्ति ? यूयम् कुत्र तरथ ? किम् तव विद्यालये आचार्याः छात्रैः सह स्नेहेन मिलन्ति ? युष्माकम् कक्षायाम् त्रिंशत् छात्राः सन्ति चत्वारिंशत् वा ?

## लिखितम्

3. इस पाठ के प्रथम नौ वाक्यों का हिन्दी में अनुवाद कीजिए (Translate the first nine sentences of this lesson into English).

4. रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks)—

अस्माकम् कक्षायाम् .................... छात्राः सन्ति। वयम् .................... तरामः। अत्र .................... छात्राः पठन्ति। अस्माकम् विद्यालये .................... सन्ति। अत्र .................... अध्यापिकाः सन्ति। अध्यापिकाः छात्रान् .................... ।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. हमारे स्कूल में चालीस अध्यापक पढ़ाते हैं।
2. क्या तू भी तालाब में तैरता है ?
3. हम नम्र छात्र हैं।
4. अध्यापक मुझे स्नेह से पढ़ाते हैं।
5. मैं समय पर स्कूल जाता हूँ।
6. हमारे प्रिंसिपल का नाम क्या है ?

1. Forty teachers teach in our school.
2. Do you also swim in the pool ?
3. We are humble students.
4. The teachers teach me afectionately.
5. I go to school on time.
6. What is the name of our principal?

एकविंशतितमः पाठः

# देशस्य रक्षा

यत् आक्रमणम् सीमान्त-प्रदेशः कार्यम् उद्योगपतिः प्रयत्नः कृषिः वर्धय् उतपादनम् प्रेरणा प्रशिक्षणम् देशभक्तः






छात्राः – भोः गुरु देव, भवान् अकथयत् यत् वयम् भारतम् अरिभ्यः रक्षिष्यामः। अस्माकम् अरिः कः अस्ति?

आचार्यः – यः देशः असमाकम् देशे आक्रमणम् करिष्यति, सः एव देशः अस्माकम् अरिः भविष्यति।

छात्राः – परम् देशम् तु सैनिकाः रक्षन्ति, वयम् कथम् रक्षाम?

आचार्यः – सैनिकाः तु सीमान्त-प्रदेशेषु युद्धम् कुर्वन्ति। परम् नगरेषु ग्रामेषु च उषित्वा वयम् एव रक्षायाः कार्यम् कुर्मः।

छात्राः – कथम् एतत्।

आचार्यः – युद्धस्य समये कृषकाः, उद्योगपतयः, अध्यापकाः छात्राः च सर्वे एव देशम् रक्षितुम् प्रयत्नम् कुर्वन्ति। कृषकाः कृषिम् वर्धयन्ति, उद्योगपतयः उत्पादनम् वर्धयन्ति। अध्यापकाः जनेभ्यः प्रेरणाम् यच्छन्ति। छात्राः प्रशिक्षणम् अधिगच्छन्ति, सैनिकाः च भवन्ति। भोः छात्राः, अधुना अवगच्छथ न वा ?

छात्राः – आम्, गुरुदेव। अवगच्छामः।

आचार्यः – भोः छात्राः, यूयम् अपि देशभक्ताः स्त।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| यत् | = | कि | (that *conjunction*) |
| आक्रमणम् | = | हमला | (attack) |
| परम् | = | परन्तु | (but) |
| सीमान्त-प्रदेशः | = | सीमा का प्रदेश | (border-area) |
| कार्यम् | = | काम | (work) |
| उद्योगपतिः | = | फैक्ट्री का मालिक | (industrialist) |
| प्रयत्नः | = | कोशिश | (effort) |
| कृषिः | = | खेती-बाड़ी | (agriculture) |
| वर्धय् | = | बढ़ाना | (to increase) |
| उत्पादनम् | = | उत्पादन | (production) |
| प्रेरणा | = | प्रेरणा | (inspiration) |
| प्रशिक्षणम् | = | ट्रेनिंग | (training) |
| वा | = | अथवा | (or) |
| देशभक्तः | = | देशभक्त | (patriot) |

**नया धातु (New verb-root)** – वर्धय् (1)

**नए रूप (New Nouns)**— प्रेरणा – *'लता'* के समान (like लता)

अरि, उद्योगपति – *'मुनि'* के समान (like मुनि)

**नए अव्यय (New avyayas)** – यत्, उषित्वा = वस् + क्त्वा, रक्षितुम् = रक्ष् + तुमुन्

## अभ्यासः

### मौखिकम्

1. 'प्रेरणा' शब्द के रूपों को 'लता' की तरह बोलिए (Decline प्रेरणा like लता)
2. निम्नलिखित शब्दों का अपने संस्कृत वाक्यों में प्रयोग कीजिए (Use the following words in Sanskrit sentences)—
   कुर्मः, सैनिकाः, अस्माकम्, वर्धयन्ति, युद्धम्, कथम्, एव।

### लिखितम्

3. युद्धस्य समये ........................ न वा।
   इस अनुच्छेद का हिन्दी में अनुवाद कीजिए (Translate the above passage in English).
4. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए (Answer in Sanskrit)—
   देशम् कः रक्षति ? युद्धस्य समये कृषकाः किम् कुर्वन्ति ? अध्यापकाः छात्रेभ्यः किम् यच्छन्ति ? सैनिकाः कुत्र रक्षन्ति ? किम् त्वम् अपि देशम् रक्षिष्यसि।
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. हम भी अपने देश की रक्षा करते हैं। | 1. We too defend our country. |
| 2. क्या तुम भी भारत की रक्षा करोगे ? | 2. Will you too defend India ? |
| 3. मैं भी अब यह समझता हूँ। | 3. I too now understand it. |
| 4. हम सब देशभक्त हैं। | 4. All of us are patriots. |
| 5. कौन-सा देश हमारा शत्रु है ? | 5. Which country is our enemy ? |
| 6. क्या छात्र भी देश की रक्षा करते हैं ? | 6. Do students too defend the country ? |

द्वाविंशतितमः पाठः

# विज्ञानस्य चमत्काराः

चमत्कारः दूरभाषम् शीतकम् शीतल रेडियो-यंत्रम् संगीतम् दूरदर्शनम् कथकः वायुयानम् गन्तव्यम् गतिः राकेट-यंत्रम् द्रुततर

एतत् विज्ञानस्य युगम्। यत्र अपि दृष्टिः गच्छति तत्र एव विज्ञानस्य चमत्कारम् पश्यामः।



एतत् अस्ति दूरभाषम्। दूरे अन्येषु नगरेषु देशेषु वा अपि स्थिताः जनाः दूरभाषेण परस्परम् वार्त्तालापम् कुर्वन्ति।



एतत् अस्ति शीतकम्। यत् अपि अस्मिन् अस्तु, तत् शीतलम् भवति चिरम् च शीतलम् एव तिष्ठति।



एकस्मिन् चित्रे अस्ति रेडियो-यंत्रम्। गृहे एव स्थित्वा जनाः प्रदेशानाम् विदेशानाम् च समाचारान् अवगच्छन्ति। संगीतम् अपि आकर्णयन्ति।



एतत् अस्ति दूरदर्शनम्। अस्मिन् जनाः न केवलम् समाचारान् गीतानि च आकर्णयन्ति परम् कथकस्य चित्राणि प्रदेशानाम् विदेशानाम् च दृश्यानि अपि पश्यन्ति। ते रामायणम्, महाभारतम् अन्यानि च नाटकानि अपि द्रष्टुम् प्रभवन्ति।



एतत् अस्ति वायुयानम्। अस्मिन् स्थित्वा जनः खगः इव आकाशे उत्पतति, अल्पे एव समये च स्वम् गन्तव्यम् विन्दति।



एतत् अस्ति राकेट-यन्त्रम्। अस्य गतिः वायुयानात् अपि द्रुततरा। अस्मिन् उपविश्य जनः चन्द्रम् अन्यान् उपग्रहान् अपि गन्तुम् प्रभवन्ति।

चिकित्सायाः क्षेत्रे अपि वयम् विज्ञानस्य चमत्कारान् सर्वत्र पश्यामः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| विज्ञानम् | = | विज्ञान | (science) |
| युगम् | = | युग | (era, age) |
| यत्र | = | जहाँ | (where) |
| दृष्टिः | = | नज़र | (sight, eye) |
| चमत्कारः | = | चमत्कार | (miracle) |
| दूरभाषम् | = | टेलीफ़ोन | (telephone) |
| स्थित | = | स्थित | (situated) |
| शीतकम् | = | रेफ्रिजरेटर | (refrigerator) |
| यत् | = | जो | (whatever) |
| शीतल | = | ठंडा | (cool) |
| रेडियो-यंत्रम् | = | रेडियो | (radio) |
| प्रदेशः | = | प्रदेश | (state) |
| विदेशः | = | विदेश | (foreign country) |

| | | | |
|---|---|---|---|
| केवलम् | = | केवल | (only) |
| समाचारः | = | समाचार | (news) |
| संगीतम् | = | संगीत | (music) |
| दूरदर्शनम् | = | टेलीविज़न | (television) |
| कथकः | = | कहने वाला | (speaker) |
| वायुयानम् | = | हवाई जहाज़ | (aeroplane) |
| अल्प | = | थोड़ा | (short) |
| गन्तव्यम् | = | लक्ष्य-स्थान | (destination) |
| राकेट-यंत्रम् | = | राकेट | (rocket) |
| गतिः | = | चाल | (speed) |
| द्रुततर | = | ज़्यादा तेज़ | (swifter, quicker) |
| चिकित्सा | = | चिकित्सा | (medical treatment) |
| प्र + भू (भव्) | = | समर्थ होना | (to be able to) |
| सर्वत्र | = | सब जगह | (everywhere) |

**नए रूप (New Nouns)**— दृष्टि, गति – *'मति'* के समान ( like मति)
चिकित्सा – *'लता'* के समान (like लता)

**उपसर्गयुक्त धातु (Verb-root with prefix)** – प्र + भू (भव्)

**नए विशेषण (New Adjectives)** – स्थितः स्थिता स्थितम्
अल्पः अल्पा अल्पम्

**नए अव्यय (New avyayas)**— केवलम्, सर्वत्र

## अभ्यासः

### मौखिकम्

1. इस पाठ में आये हुए यंत्रों के नाम बताइए (Tell the names of the gadgets discussed in this lesson).
2. संस्कृत में नाम बताइए (Tell the Sanskrit words)
   टेलिफ़ोन, रेडियो, टेलिविज़न, हवाई जहाज़, राकेट।

## लिखितम्

3. नीचे लिखे यंत्रों का संस्कृत में कम से कम एक उपयोग लिखिए (Write in Sanskrit at least one use of the following gadgets)—

दूरभाषम्, दूरदर्शनम्, राकेट-यन्त्रम्।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. हम वायुयान में बैठकर आसमान में उड़ते हैं। — We sit in an aeroplane and fly in the sky.
2. टेलिविज़न पर हम चित्र भी देख लेते हैं। — On a television, we can see the picture too.
3. क्या तुम्हारे घर में टेलिविज़न है ? — Do you have a television in your house ?
4. लोग रेडियो से समाचार सुन लेते हैं। — People listen to the news from the radio.
5. वायुयान की रफ्तार राकेट से तेज़ नहीं होती। — The speed of an aeroplane is not faster than that of a rocket.



त्रयोविंशतितमः पाठः

# बुद्धेः शक्तिः

अभिधानम् मृगः एकदा मृगराजः क्रमेण स्वयम् तृप्त शशकः वारः अन्यः वनराजः प्रतिबिम्बः बलम्



एकः सिंहः आसीत्। तस्य अभिधानम् भासुरकः आसीत्। सः प्रतिदिनम् अनेकान् मृगान् मारयति स्म। एकदा सर्वे मृगाः तस्य समीपे अगच्छन् अवदन् च– 'हे मृगराज, त्वम् अनेकान मृगान् प्रतिदिनम् मारयसि। त्वम् तान् न मारय। प्रतिदिनम् क्रमेण एकः मृगः स्वयम् एव तव समीपे आगमिष्यति। तम् खादित्वा त्वम् तृप्तः भव।' सिंहः प्रत्यवदत्–'एवम् अस्तु'।

तदा प्रतिदिनम् एकः मृगः तत्र आगच्छति स्म। सिंहः च तम् खादति स्म। एकदा शशकस्य वारः आसीत्। सः मार्गे एकम् कूपम् अपश्यत् सिंहस्य समीपे गत्वा च अवदत्–हे वनराज, वने एकः अन्यः सिंह अपि वसति। सः कथयति–अहम् वनराजः, न तु भासुरकः। तत् आकर्ण्य भासुरकः अक्रुध्यत्।

तदा शशकः तम् सिंहम् कूपम् अनयत्। भासुरकः कूपे स्वम् प्रतिबिम्बम् अपश्यत्। स प्रतिबिम्बम् एकम् अन्यम् सिंहम् अवागच्छत्। तत् मारयितुम् सः कूपे अपतत् अनश्यत् च।

अतः प्राज्ञः कथयति–'यस्य बुद्धिः बलम् तस्य'।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अभिधानम् | = | नाम | (name) |
| मृगः | = | पशु | (animal) |
| एकदा | = | एक बार | (once) |
| मृगराजः | = | पशुओं का राजा | (king of animals) |
| क्रमेण | = | बारी से | (by turn) |
| स्वयम् | = | खुद | (oneself) |
| तृप्तः | | तृप्त | (satisfied) |
| शशकः | = | खरगोश | (rabbit, hare) |
| वारः | = | बारी | (turn) |
| अन्यः | = | दूसरा | (other) |
| वनराजः | = | वन का राजा | (king of the forest) |
| स्म | = | *(भूतकाल बनाने वाला अव्यय)* | *(past tense maker)* |
| प्रतिबिम्बः | = | परछाईं | (shadow) |
| बलम् | = | शक्ति | (strength) |

**उपसर्ग-युक्त धातु (Verb-root with prefix)**—प्रति + वद्, आ + गम् (गच्छ) अव + गम् (गच्छ)

**नया विशेषण (New Adjective)** – तृप्तः तृप्ता तृप्तम्

**नया अव्यय (New avyayas)** – एकदा, क्रमेण

**विशेष-प्रयोगः** – मारयति स्म, आगच्छति स्म – ये भूतकाल के रूप हैं। लट्-लकार के रूप के बाद **स्म** लगाने से भूतकाल का रूप बन जाता है।

## अभ्यासः

### मौखिकम्

1. निम्नलिखित शब्दों को संस्कृत-वाक्यों में प्रयुक्त कीजिए (Use the following words in Sanskrit sentences)—

एकदा, वनराजः वारः, समीपे, अक्रुध्यत्, मार्गे।

2. वाक्य-पूर्ति कीजिए (Fill in the blanks)—

सिंहस्य अभिधानम् .............. आसीत्। सः अनेकान् .............. मारयति स्म।
भासुरकः कूपे स्वम् .............. अपश्यत्। शशकः सिंहम् .............. अनयत्।
मृगाः सिंहस्य .............. अगच्छन्।

### लिखितम्

3. इन प्रश्नों के उत्तर संस्कृत में दीजिए (Answer in Sanskrit)—

सिंहः कुत्र अवसत् ? सिंहम् कूपम् कः अनयत्? सिंहः मृगान् किम् प्रत्यवदत्? वनराजः कः आसीत्? सिंहः कुत्र अपतत्?

4. इस पाठ के दूसरे अनुच्छेद का हिन्दी में अनुवाद कीजिए (Translate the second para of this lesson into English).

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. जंगल में एक शेर रहता था। | 1. A lion lived in a jungle. |
| 2. एक बार खरगोश की भी बारी आई। | 2. Once a rabbit's turn also came. |
| 3. शेर खरगोश पर नाराज़ हुआ। | 3. The lion got angry at the rabbit. |
| 4. भासुरक खरगोश के साथ कूएँ पर गया। | 4. Bhasurak went to the well along with the rabbit. |
| 5. उसने कूएँ में अपनी परछाईं देखी। | 5. He saw his shadow in the well. |
| 6. शेर कूँए में गिर कर मर गया। | 6. The lion fell in the well and died. |

चतुर्विंशतितमः पाठः

# मूर्खः कच्छपः

कच्छपः निदाघः शुष् व्याकुल हंसः अन्यत्र सम् + भू(भव्)

लगुडः मध्यभागः आश्चर्यः कोलाहलः प्राणः



एकः कच्छपः आसीत्। सः सरोवरे वसति स्म। एकदा निदाघे सरोवरस्य जलम् अशुष्यत्। जलम् बिना कच्छपः व्याकुलः अभवत्।

तस्य कच्छपस्य द्वौ हंसौ मित्रे आस्ताम्। तौ कच्छपम् व्याकुलम् दृष्ट्वा तम् अपृच्छताम्–"भोः मित्र, त्वम् किमर्थम् व्याकुलः भवसि। एकः उपायः अस्ति। आवाम् त्वाम् अन्यत्र नयावः।"

कच्छपः प्रत्यवदत्–"कथम् एतत् सम्भवति। अहम् उत्पतितुम् न प्रभवामि।"

हंसौ अवदताम्–"आकर्णय, आवाम् लगुडम् आनेष्यावः। त्वम्

लगुडस्य मध्यभागम् मुखेन अधिगमिष्यसि। तदा आवाम् लगुडेन सह उत्पतिष्यावः। परम् त्वम् मार्गे किम् अपि न वदिष्यसि, अन्यथा त्वम् नीचैः पतिष्यसि।" ते त्रयः एवम् एव अकुर्वन्। हंसौ च कच्छपेन लगुडेन सह आकाशे उदपतताम्।

मार्गे ग्रामस्य जनाः एतम् आश्चर्यम् आकाशे अपश्यन्। तत्र च कोलाहलः अभवत्। कोलाहलम् आकर्ण्य कच्छपः तस्य कारणम् प्रष्टुम् प्रयत्नम् अकरोत्। तदा एव सः नीचैः अपतत् प्राणान् च अत्यजत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| कच्छपः | = | कछुआ | (tortoise) |
| निदाघः | = | गर्मी | (summer) |
| शुष् | = | सूखना | (to dry) |
| व्याकुलः | = | व्याकुल | (perplexed, grieved) |
| हंसः | = | हंस | (swan) |
| अन्यत्र | = | कहीं और | (somewhere else) |
| सम् + भू (भव्) | = | सम्भव होना | (to be possible) |
| लगुडः | = | छड़ी | (stick) |
| मध्यभागः | = | बीच वाला भाग | (middle part) |
| अन्यथा | = | नहीं तो | (otherwise) |
| आश्चर्यः | = | आश्चर्य | (surprise) |
| कोलाहलः | = | शोर | (noise) |
| प्राणः | = | जीवन | (life) |

**नया धातु (New verb-root)** – शुष् (2)

**उपसर्ग-युक्त धातु (Verb-root with prefix)** – सम् + भू

**नए अव्यय (New avyayas)** – अन्यत्र, अन्यथा

**विशेषः**– प्राण शब्द का प्रयोग सदा बहुवचन में ही होता है। (The word प्राण is always used in plural.)

## अभ्यासः

### मौखिकम्

1. तीन छात्र मिलकर इस कहानी का संस्कृत में अभिनय करें (Three students should role-play this story in Sanskrit)

2. निम्नलिखित शब्दों का अपने संस्कृत वाक्यों में प्रयोग कीजिए। (Use the following words in your Sanskrit sentences)—
व्याकुलः, नीचैः, सह, प्रणान्, सरोवरे, दृष्ट्वा, लगुडेन।

### लिखितम्

3. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए (Answer the following questions in Sanskrit)—
कच्छपः कुत्र अवसत्? सः किमर्थम् व्याकुलः अभवत्? किम् कच्छपः उत्पतितुम् प्रभवति? हंसौ कुत्र उदपतताम्? हंसौ कम् व्याकुलम् अपश्यताम्? कच्छपः कुत्र अपतत्?

4. इस पाठ के चौथे अनुच्छेद का हिन्दी में अनुवाद कीजिए (Translate the fourth paragraph of this lesson in English).

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. पक्षी पानी के बिना व्याकुल हो जाते हैं। | 1. Birds become restless without water. |
| 2. जब तालाब में पानी सूख गया तब कछुआ व्याकुल हो गया। | 2. When the water in the pool dried up then the tortoise became restless. |
| 3. दो हंसों ने कछुए से पूछा। | 3. Two swans asked the tortoise. |
| 4. वहाँ पर शोर हुआ। | 4. A noise occured there. |
| 5. कल हम तीनों स्कूल जायेंगे। | 5. Tomorrow all three of us will go to school. |

# श्रृगालः सिंहः न भवतिः

मृगया श्रृगालः शावकः सिंही अनुजः प्रति जातिः भयभीतः
कातरः निन्दा निन्द् कलहः



एकदा एकः सिंहः मृगयायै वने अभ्रमत्। परम् सः किंचित् अपि न अविन्दत्। तदा सः श्रृगालस्य एकम् शावकम् अपश्यत्। सः तम् शावकम् गृहम् आनयत्। सिंहः सिंहीम् अवदत्–"एषः शावकः तव भोजनम् अस्ति। एतम् खादित्वा तृप्ता भव।" सिंही प्रत्यवदत्–"एषः शावकः। एतम् मारयितुम् न वाञ्छामि। एतम् अहम् पालयिष्यामि। एषः मम तृतीयः पुत्रः भविष्यति। एतौ मम पुत्रौ अस्य अनुजौ भविष्यतः। एषः मम पुत्राभ्याम् सह खेलतु।"

त्रयः अपि शावकाः परस्परम् जातिम् न अवागच्छन्। ते परस्परम् खेलन्ति स्म। एकदा ते वने अखेलन्। तदा एकम् गजम् दृष्ट्वा सिंहस्य

शावकः अकथयत्–"एषः अस्माकम् अरिः। एतम् वयम् मारयिष्यामः।" श्रृगालस्य शावकः गजम् दृष्ट्वा भयभीतः अभवत् गृहम् प्रति च अधावत्। गृहम् गत्वा अनुजौ अम्बाम् अवदताम्– "आवयोः अग्रजः कातरः अस्ति। सः गजम् दृष्टवा गृहम् प्रति अधावत्।" स्वाम् निन्दाम् आकर्ण्य अग्रजः अवदत्–"एतौ अनुजौ माम् निन्दतः। अहम् एतौ मारयिष्यामि।"

तदा सिंही श्रृगालस्य पुत्रम् अन्यत्र अनयत् अकथयत् च– "त्वम् ताभ्याम् मा क्रुध्य। तौ सिंहस्य पुत्रौ, त्वम् च श्रृगालस्य शावकः। यदि कलहः भविष्यति तदा तौ त्वाम् मारयिष्यतः।

तदा श्रृगालस्य शावकः तूष्णीम् ततः अधावत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मृगया | = | शिकार | (hunting) |
| श्रृगाल | = | गीदड़ | (jackal) |
| शावक | = | बच्चा | (young-one) |
| सिंही | = | शेरनी | (lioness) |
| अनुजः | = | छोटा भाई | (younger brother) |
| पुत्रः | = | बेटा | (son) |
| जातिः | = | जाति | (caste, race) |
| भयभीतः | = | डरा हुआ | (frightened) |
| प्रति | = | की ओर | (towards) |
| कातरः | = | डरपोक | (coward) |
| निन्दा | = | निन्दा | (condemnation) |
| निन्द् | = | निन्दा करना | (to condemn) |
| कलहः | = | झगड़ा | (quarrel) |
| ततः | = | वहां से | (from there) |

**नया धातु (New verb-root)** – निन्द् (1)

**नए रूप (New nouns)** – मृगया – *लता* के समान ( like लता)

जाति – *मति* के समान (like मति)

**नए अव्यय (New avyayas)** – प्रति, दृष्टवा = दृश् + क्त्वा

मारयितुम् = मारय् + तुमुन्

**उपपद विभक्तिः**– प्रति के योग में जो शब्द आता है, उसमें सदा दूसरी विभक्ति होती है। (The word used along with प्रति gets the second vibhakti).

## अभ्यासः

### मौखिकम्

1. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—

   सिंहाः कुत्र अभ्रमत्? सः तत्र किमर्थम् अभ्रमत्? सिंही शृगालस्य पुत्रम् कुत्र अनयत्? शृगालस्य पुत्रः कम् दृष्टवा भयभीतः अभवत्? अग्रजः कः आसीत्?

2. इस पाठ में द्विवचन शब्द छाँटकर बताइए (Select all the dual number words in this lesson).

### लिखितम्

3. निम्नलिखित शब्दों को यथा-स्थान रखकर वाक्य-पूर्ति कीजिए (Fill in the blanks with the following words)—

   अधावत्, अग्रजः, माम्, क्रुध्य, तूष्णीम्।

   शृगालस्य पुत्रः सिंहस्य पुत्रयोः ...................... आसीत्। शृगालस्य पुत्रः गृहम् प्रति .................. । त्वम् ताभ्याम् मा ................ । एतौ ...................... निन्दतः। शृगालस्य शावकः ...................... अधावत्।

4. पहले अनुच्छेद का हिन्दी में अनुवद कीजिए (Translate the first paragraph into English).

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. शेर ने शेरनी से कहा।
2. शेर के दो पुत्र थे।
3. हाथी को देखकर गीदड़ का बच्चा भाग गया।
4. शेरनी उसे कहीं और ले गई।
5. क्या तू भी कायर है?
6. शेरनी ने कहा, 'मैं इसको पालूँगी।'

1. The lion said to the lioness.
2. The lion had two male cubs.
3. The jackal's baby ran away after seeing the elephant.
4. The lioness took him elsewhere.
5. Are you also a coward ?
6. The lioness said, "I will bring him up".



❐ ❐

षड्विंशतितमः पाठः

# श्रद्धायाः प्रभावः

धनुर्विद्या   सर्वी + कृ   श्रद्धा   शिथिल   शनैः शनैः   धनुर्धरः
भष्   बाणः   भवान्   दर्शय्   गुरुदक्षिणा   छुर्



एकः बालकः आसीत्। तस्य अभिधानम् एकलव्यः आसीत्। सः धनुर्विद्याम् अधिगन्तुम् वाञ्छति स्म। सः द्रोणाचार्यस्य समीपे गत्वा अवदत्– "गुरुदेव, अहम् अपि तव शिष्यः भवितुम् वाञ्छामि। कृपया स्वीकुरु।" आचार्यः प्रत्यवदत्– "अहम् कौरवान् पाण्डवान् च पाठयामि। अन्यः समयः न अस्ति।" एकलव्यः निराशः भूत्वा गृहम् आगच्छत् परम् तम् आचार्यम् प्रति तस्य श्रद्धा शिथिला न अभवत्।

सः तस्य आचार्यस्य एकाम् मूर्तिम् अरचयत्। सः प्रतिदिनम् प्रातः ताम् मूर्तिम नमति स्म मूर्तिम् च नत्वा धनुर्विद्यायाः अभ्यासम् करोति स्म। शनैः शनैः सः प्रसिद्धः धनुर्धरः अभवत।

एकदा तस्मिन् वने पाण्डवानाम् कुक्कुरः तम् दृष्ट्वा अभषत्। एकलव्यः बाणैः तस्य कुक्कुरस्य मुखम् असीव्यत्।

द्रोणाचार्यः एतत् दृष्टवा तत्र आगच्छत् तम् च अपृच्छत्–"कः तव आचार्यः?" एकलव्यः प्रत्यवदत्–"भवान् एव मम आचार्यः।" तदा सः द्रोणाचार्याय ताम् मूर्तिम् अदर्शयत्।

द्रोणाचार्यः अवदत्–"यदि अहम् तव आचार्यः तदा गुरुदक्षिणाम् मह्यम यच्छ। अहम् तव हस्तस्य अंगुष्ठम् वाञ्छामि।"

एकलव्यः त्वरितम् स्वम् अंगुष्ठम् अच्छुरत् आचार्याय च अयच्छत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| धनुर्विद्या | = | धनुष बाण की विद्या | (archery) |
